अप्रक्षालितपादेषु प्रविशन्ति महानलं ।
खलेषु गोष्ठेषु च वै द्रोहो येषु गृहेषु वै ॥ ९८ ॥
तेषु सर्व्वं यथान्यायं विहरन्ति रमन्ति च ।
ग्रामणयास्तनयस्त्वेकः कावाजङ्घ इति स्मृतः ॥ ९९ ॥
तेनाविष्टो रतिं सर्व्वो नैव प्राप्नोति वै पुरे ।
भुञ्जन् यो गायते मैत्रे गायते हसते च यः ॥ १०० ॥
सन्ध्यामैथुनिनञ्चैव नरमाविशति द्विज ।
कन्यात्रयं प्रसूता सा या कन्या ऋतुहारिणी ॥ १०१ ॥
एका कुचहरा कन्या अन्या व्यञ्जनहारिका ।
तृतीया तु समाख्याता कन्यका जातहारिणी ॥ १०२ ॥
यस्या न क्रियते सर्व्वः सम्यक् वैवाहिको विधिः ।
कालातीतोऽथवा तस्या हरत्येका कुचद्वयं ॥ १०३ ॥
सम्यक् श्राद्धमदत्त्वा च तथानर्च्य च मातरं ।
विवाहितायाः कन्याया हरति व्यञ्जनं तथा ॥ १०४ ॥
अन्द्यम्बुशून्ये च तथा विधूपे सूतिकागृहे ।
अदीपशस्त्रमुषले भूतिसर्षपवर्जिते ॥ १०५ ॥
अनुप्रविश्य सा जातमपहृत्यात्मसम्भवं ।
क्षणप्रसविनी बालं तत्रैवोत्सृजते द्विज ॥ १०६ ॥
सा जातहारिणी नाम सुघोरा पिशिताशना ।
तस्मात् संरक्षणं कार्य्यं यत्नतः सूतिकागृहे ॥ १०७ ॥
स्मृतिञ्चाप्रयतानाञ्च शून्यागारनिषेवणात् ।
आहन्ति सुतस्तस्याः प्रचण्डो नाम नामतः ॥ १०८ ॥

पौत्रेभ्यस्तस्य सम्भूता लोकाः शतसहस्रशः ।
चण्डालयोनयश्चाष्टौ दण्डपाशातिभीषणाः ॥ १०९ ॥
क्षुधाविष्टास्ततो लोकास्ताश्च चण्डालयोनयः ।
अभ्यधावन्त चान्योन्यमत्तुकामाः परस्परं ॥ ११० ॥
प्रचण्डो वारयित्वा तु तास्ताश्चण्डालयोनयः ।
समये स्थापयामास यादृशे तादृशं शृणु ॥ १११ ॥
अद्य प्रभृति लोकानामावासं यो हि दास्यति ।
दण्डं तस्याहमतुलं पातयिष्ये न संशयः ॥ ११२ ॥
चण्डालयोन्योऽवसथे लोका या प्रसविष्यति ।
तस्याश्च सन्ततिः पूर्वा साच सद्यो न शिष्यति ॥ ११३ ॥
प्रसूते कन्यके द्वे तु स्त्रीपुंसोर्बीजहारिणी ।
वातरूपामरूपाञ्च तस्याः प्रहरणान्तु ते ॥ ११४ ॥
वातरूपा निषेकान्ते सा यस्मै क्षिपते सुतं ।
स पुमान् वातशुक्रत्वं प्रयाति वनितापि वा ॥ ११५ ॥
तथैव गच्छतः सद्यो निर्बीजत्वमरूपया ।
अज्ञाताशी नरो योऽसौ तथा चापि वियोगिनः ॥ ११६ ॥
विद्वेषिणी तु या कन्या भ्रुकुटीकुटिलानना ।
तस्या द्वौ तनयौ पुंसामपकारप्रकाशकौ ॥ ११७ ॥
निर्बीजत्वं नरो याति नारी वा शौचवर्ज्जिता ।
पैशुन्याभिरतं लोलमसज्जलनिषेवणं ॥ ११८ ॥
पुरूपद्वेषिणञ्चैतौ नरमाक्रम्य तिष्ठतः ।
माता भ्राता तथा मित्रैरभीष्टैः स्वजनैः परैः ॥ ११९ ॥

विद्विष्टो नाशमायाति पुरुषो धर्म्मतोऽर्थतः ।
एकस्तु स्वगुणाँल्लोके प्रकाशयति पापकृत् ॥ १२० ॥
द्वितीयस्तु गुणान् मैत्रीं लोकस्थामपकर्षति ।
इत्येते दौःसहाः सर्व्वे यक्ष्मणः सन्ततावथ ॥
पापाचाराः समाख्याता यैर्व्याप्तमखिलं जगत् ॥१२१ ॥

इति श्रीमार्कण्डेयपुराणे दौःसहोत्पत्तिसमापनं नाम ॥ ५१ ॥

द्विपञ्चाशोऽध्यायः ॥

मार्कण्डेय उवाच ॥

इत्येष तामसः सर्गो ब्रह्मणोऽव्यक्तजन्मनः ।
रुद्रसर्गं प्रवक्ष्यामि तन्मे निगदतः शृणु ॥ १ ॥
तनयाश्च तथैवाष्टौ पत्न्यः पुत्राश्च ते तथा ।
कल्पादावात्मनस्तुल्यं सुतं प्रध्यायतः प्रभोः ॥ २ ॥
प्रादुरासीदथाङ्केऽस्य कुमारो नीललोहितः ।
रुरोद सुस्वरं सोऽथ द्रवंश्च द्विजसत्तम ॥ ३ ॥
किं रोदिषीति तं ब्रह्मा रुदन्तं प्रत्युवाच ह ।
नाम देहीति तं सोऽथ प्रत्युवाच जगत्पतिं ॥ ४ ॥
रुद्रस्त्वं देव नाम्नासि मा रोदीर्धैर्य्यमावह ।
एवमुक्तस्ततः सोऽथ सप्तकृत्वो रुरोद ह ॥ ५ ॥

ततोऽन्यानि ददौ तस्मै सप्त नामानि वै प्रभुः ।
स्थानानि चैषामष्टानां पत्नीः पुत्रांश्च वै द्विज ॥ ६ ॥
भवं सर्व्वं तथेशानं तथा पशुपतिं प्रभुः ।
भीममुग्रं महादेवमुवाच स पितामहः ॥ ७ ॥
चक्रे नामान्यथैतानि स्थानान्येषाञ्चकार ह ।
सूर्य्यो जलं मही वह्निर्व्वायुराकाशमेव च ॥ ८ ॥
दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात् ।
सुवर्च्चला तथैवोमा विकेशी चापरा स्वधा ॥ ९ ॥
स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमं ।
सूर्य्यादीनां द्विजश्रेष्ठ रुद्राद्यैर्नामभिः सह ॥ १० ॥
शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ।
स्कन्दः सर्गोऽथ सन्तानो बुधश्चानुक्रमात् सुतः ॥ ११ ॥
एवम्प्रकारो रुद्रोऽसौ सतीं भार्य्यामविन्दत ।
दक्षकोपाच्च तत्याज सा सती स्वं कलेवरं ॥ १२ ॥
हिमवद्दुहिता साभून्मेनायां द्विजसत्तम ।
तस्या भ्राता तु मैनाकः सखाम्भोधेरनुत्तमः ॥ १३ ॥
उपयेमे पुनश्चैनामनन्यां भगवान् भवः ।
देवौ धाताविधातारौ भृगोः ख्यातिरसूयत ॥ १४ ॥
श्रियञ्च देवदेवस्य पत्नी नारायणस्य या ।
आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः ॥ १५ ॥
धाताविधात्रोस्ते भार्य्ये तयोर्ज्जातौ सुतावुभौ ।
प्राणश्चैव मृकण्डुश्च पिता मम महायशाः ॥ १६ ॥

मनस्विन्यामहं तस्मात् पुत्त्रो वेदशिरा मम ।
धूम्रवत्यां समभवत् प्राणस्यापि निबोध मे ॥ १७ ॥
प्राणस्य द्युतिमान् पुत्त्र उत्पन्नस्तस्य चात्मजः ।
अजराश्च तयोः पुत्त्राः पौत्त्राश्च बहवोऽभवन् ॥ १८ ॥
पत्नी मरीचेः सम्भूतिः पौर्णमासमसूयत ।
विरजाः पर्व्वतश्चैव तस्य पुत्त्रौ महात्मनः ॥ १९ ॥
तयोः पुत्त्रांस्तु रक्ष्यिष्ये वंशसंकीर्त्तने द्विज ।
स्मृतिश्चाङ्गिरसः पत्नी प्रसूता कन्यकास्तथा ॥ २० ॥
शिनीवाली कुहुश्चैव राका चानुमती तथा ।
अनसूया तथैवात्रेर्जज्ञे पुत्त्रानकल्मषान् ॥ २१ ॥
सोमं दुर्व्वाससञ्चैव दत्तात्त्रेयञ्च योगिनं ।
प्रीत्यां पुलस्त्यभार्य्यायां दत्तोलिस्तत्सुतोऽभवत् ॥ २२ ॥
पूर्व्वजन्मनि सोऽगस्त्यः स्मृतः स्वायम्भुवेऽन्तरे ।
कर्द्दमश्चार्व्ववीरश्च सहिष्णुश्च सुतत्त्रयं ॥ २३ ॥
क्षमा तु सुषुवे भार्य्या पुलहस्य प्रजापतेः ।
क्रतोस्तु सन्नतिर्भार्य्या बालिखिल्यानसूयत ॥ २४ ॥
षष्टिर्यानि सहस्राणि ऋषीणामूर्द्धरेतसां ।
ऊर्ज्जायान्तु वशिष्ठस्य सप्ताजायन्त वै सुताः ॥ २५ ॥
रजोगात्रोर्द्ध्वबाहुश्च सवलश्चानघस्तथा ।
सुतपाः शुक्रइत्येते सर्व्वे सप्तर्षयः स्मृताः ॥ २६ ॥
योऽसावग्निरभीमानी ब्रह्मणस्तनयोऽग्रजः ।
तस्मात् स्वाहा सुतान् लेभे त्रीनुदारौजसो द्विज ॥ २७ ॥

पावकं पवमानञ्च शुचिञ्चापि जलाशिनं ।
तेषान्तु सन्ततावन्ये चत्वारिंशच्च पञ्च च ॥ २८ ॥
कथ्यन्ते बहुशश्चैते पिता पुत्रत्रयञ्च यत् ।
एवमेकोनपञ्चाशद्वर्ज्ज्ञेयाः परिकीर्त्तिताः ॥ २९ ॥
पितरो ब्रह्मणा सृष्टा ये व्याख्याता मया तव ।
अग्निस्वात्ता वर्हिषदोऽनग्नयः साग्नयश्च ये ॥ ३० ॥
तेभ्यः स्वधा सुते जज्ञे मेनां वै धारिणीं तथा ।
ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विज ॥ ३१ ॥

इति श्रीमार्कण्डेयपुराणे रुद्रसर्गाभिधानो नाम ॥ ५२ ॥

त्रिपञ्चाशोऽध्यायः ॥

क्रौष्टुकिरुवाच ॥

स्वायम्भुवं त्वयाख्यातमेतन्मन्वन्तरञ्च यत् ।
तदहं भगवन् सम्यक् श्रोतुमिच्छामि कथ्यतां ॥ १ ॥
मन्वन्तरप्रमाणञ्च देवा देवर्षयस्तथा ।
ये च क्षितीशा भगवन् देवेन्द्रश्चैव यस्तथा ॥ २ ॥

मार्कण्डेय उवाच ॥

मन्वन्तराणां संख्याता साधिका ह्येकसप्ततिः ।
मानुषेण प्रमाणेन शृणु मन्वन्तरञ्च मे ॥ ३ ॥

त्रिंशत्कोट्यस्तु संख्याताः सहस्राणि च विंशतिः ।
सप्तषष्टिस्तथान्यानि नियुतानि च संख्यया ॥ ४ ॥
मन्वन्तरप्रमाणञ्च इत्येतत् साधिकं विना ।
अष्टौ शतसहस्राणि दिव्यया संख्यया स्मृतं ॥ ५ ॥
द्विपञ्चाशत्तथान्यानि सहस्राण्यधिकानि च ।
स्वायम्भुवो मनुः पूर्व्वं मनुः स्वारोचिषस्तथा ॥ ६ ॥
औत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ।
षडेते मनवोऽतीतास्तथा वैवस्वतोऽधुना ॥ ७ ॥
सावर्णिः पञ्च रौच्याश्च भौत्याश्चागमिनस्त्वमी ।
एतेषां विस्तरं भूयो मन्वन्तरपरिग्रहे ॥ ८ ॥
वक्ष्ये देवानृषींश्चैव यक्षेन्द्राः पितरश्च ये ।
उत्पत्तिं संयहं ब्रह्मन् श्रूयतामस्य सन्ततिः ॥ ९ ॥
यत्त्र तेषामभूत् क्षेत्रं तत्पुत्त्राणां महात्मनां ।
मनोःस्वायम्भुवस्यासन् दश पुत्त्रास्तु तत्समाः ॥ १० ॥
यैरियं पृथिवी सर्व्वा सप्तद्वीपा सपर्व्वता ।
ससमुद्रा करवती प्रतिवर्षं निवेशिता ॥ ११ ॥
स्वायम्भुवेऽन्तरे पूर्व्वमाद्ये त्रेतायुगे तथा ।
प्रियव्रतस्य पुत्त्रैस्तैः पौत्त्रैः स्वायम्भुवस्य च ॥ १२ ॥
प्रियव्रतात् प्रजावत्यां वीरात् कन्या व्यजायत ।
कन्या सा तु महाभागा कर्द्दमस्य प्रजापतेः ॥ १३ ॥
कन्ये द्वे दश पुत्त्रांश्च सम्राट्कुक्षी च ते उभे ।
तयोर्वै भ्रातरः शूराः प्रजापतिसमा दश ॥ १४ ॥

अग्नीध्रो मेधातिथिश्च वपुष्मांश्च तथापरः ।
ज्योतिष्मान्द्युतिमान् भव्यः सवनः सप्त एव ते ॥ १५ ॥
प्रियव्रतोऽभ्यषिञ्चत्तान् सप्त सप्तसु पार्थिवान् ।
द्वीपेषु तेन धर्म्माग्य द्वीपांश्चैव निबोध मे ॥ १६ ॥
जम्बुद्वीपे तथाग्नीध्रं राजानं कृतवान् पिता ।
प्लक्षद्वीपेश्वरश्चापि तेन मेधातिथिः कृतः ॥ १७ ॥
शाल्मलेस्तु वपुष्मन्तं ज्योतिष्मन्तं कुशाह्वये ।
क्रौञ्चद्वीपे द्युतिमन्तं भव्यं शाकाह्वयेश्वरं ॥ १८ ॥
पुष्कराधिपतिञ्चापि सवनं कृतवान् सुतं ।
महावीतो धातकिश्च पुष्कराधिपतेः सुतौ ॥ १९ ॥
द्विधा कृत्वा तयोर्वर्षं पुष्करः सन्न्यवेशयत् ।
भव्यस्य पुत्राः सप्तासन्नामतस्तान्निबोध मे ॥ २० ॥
जलदश्च कुमारश्च सुकुमारो मनीवकः ।
कुशोत्तरोऽथ मेधावी सप्तमस्तु महाद्रुमः ॥ २१ ॥
तन्नामकानि वर्षाणि शाकद्वीपे चकार सः ।
तथा द्युतिमतः सप्त पुत्रास्तांश्च निबोध मे ॥ २२ ॥
कुशलो मनुगश्चोष्णः प्राकरश्चार्थकारकः ।
मुनिश्च दुन्दुभिश्चैव सप्तमः परिकीर्त्तितः ॥ २३ ॥
तेषां स्वनामधेयानि क्रौञ्चद्वीपे तथाभवन् ।
ज्योतिष्मतः कुशद्वीपे पुत्रनामाङ्कितानि वै ॥ २४ ॥
तत्रापि सप्त वर्षाणि तेषां नामानि मे शृणु ।
उद्भिदं वैणवञ्चैव सुरथं लम्बनं तथा ॥ २५ ॥

धृतिमत् प्राकरञ्चैव कापिलं चापि सप्तमं ।
वपुष्मतः सुताः सप्त शाल्मलेशस्य चाभवन् ॥ २६ ॥
श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ।
वैद्युतो मानसश्चैव केतुमान् सप्तमस्तथा ॥ २७ ॥
तथैव शाल्मलेस्तेषां समनामानि सप्त वै ।
सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै ॥ २८ ॥
तेषां नामाङ्कितैर्वर्षैः प्लक्षद्वीपस्तु सप्तधा ।
पूर्व्वं शाकभवं वर्षं शिशिरन्तु सुखोदयं ॥ २९ ॥
आनन्दञ्च शिवञ्चैव क्षेमकञ्च ध्रुवन्तथा ।
प्लक्षद्वीपादिभूतेषु शाकद्वीपान्तिमेषु वै ॥ ३० ॥
ज्ञेयः पञ्चसु धर्म्मश्च वर्णाश्रमविभागजः ।
नित्यः स्वाभाविकश्चैव अहिंसाविधिवर्ज्जितः ॥ ३१ ॥
पञ्चस्वेतेषु वर्षेषु सर्व्वसाधारणः स्मृतः ।
अग्नीध्राय पिता पूर्व्वं जम्बुद्वीपं ददौ द्विज ॥ ३२ ॥
तस्य पुत्रा बभूवुर्हि प्रजापतिसमा नव ।
ज्येष्ठो नाभिरिति ख्यातस्तस्य किंपुरुषोऽनुजः ॥ ३३ ॥
हरिवर्षस्तृतीयस्तु चतुर्थोऽभूदिलावृतः ।
रम्यश्च पञ्चमः पुत्रो हिरण्मयःषष्ठ उच्यते ॥ ३४ ॥
कुरुस्तु सप्तमस्तेषां भद्राश्वश्चाष्टमः स्मृतः ।
नवमः केतुमालश्च तन्नाम्ना वर्षसंस्थितिः ॥ ३५ ॥
यानि किंपुरुषाख्यानि वर्ज्जयित्वा हिमाह्वयं ।
तेषां स्वभावतः सिद्धिः सुखप्राया ह्ययत्नतः ॥ ३६ ॥

विपर्य्ययो न तेष्वस्ति जरामृत्युभयं न च ।
धर्म्माधर्म्मौ न तेष्वास्तां नोत्तमाधममध्यमाः ॥ ३७ ॥
न वै चतुर्युगावस्था नार्त्तवा ऋतवो न च ।
अग्नीध्रसूनोर्नाभेस्तु ऋषभोऽभूत्सुतो द्विज ॥ ३८ ॥
ऋषभाद्भरतो जज्ञे वीरः पुत्त्रशताद्वरः ।
सोऽभिषिच्यर्षभः पुत्त्रं महाप्राव्राज्यमास्थितः ॥ ३९ ॥
तपस्तेपे महाभागः पुलहाश्रमसंश्रयः ।
हिमाह्वं दक्षिणं वर्षं भरताय पिता ददौ ॥ ४० ॥
तस्मात्तु भारतं वर्षं तस्य नाम्ना महात्मनः ।
भरतस्याप्यभूत्पुत्त्रः सुमतिर्नाम धार्म्मिकः ॥ ४१ ॥
तस्मिन्राज्यं समावेश्य भरतोऽपि वनं ययौ ।
एतेषां पुत्त्रपौत्त्रैस्तु सप्तद्वीपा वसुन्धरा ॥ ४२ ॥
प्रियव्रतस्य पुत्त्रैस्तु भुक्ता स्वायम्भुवेऽन्तरे ।
एष स्वायम्भुवः सर्गः कथितस्ते द्विजोत्तम ॥ ४३ ॥
पूर्व्वमन्वन्तरे सम्यक् किमन्यत् कथयामि ते ॥ ४४ ॥

इति श्रीमार्कण्डेय पुराणे मन्वन्तरकथनं नाम ॥ ५३ ॥

चतुःपञ्चाशोऽध्यायः ॥

क्रौष्टुकिरुवाच ॥

कति द्वीपाः समुद्रा वा पर्व्वता वा कति द्विज ।
कियन्ति चैव वर्षाणि तेषां नद्यश्च का मुने ॥ १ ॥

महाभूतप्रमाणञ्च लोकालोकन्तथैव च ।
पर्य्यासं परिमाणञ्च गतिञ्चन्द्रार्कयोरपि ॥ २ ॥
एतत् प्रब्रूहि मे सर्व्वं विस्तरेण महामुने ॥ ३ ॥

मार्कण्डेय उवाच ॥

शतार्द्धकोटिविस्तारा पृथिवी कृत्स्नशो द्विज ।
तस्या हि स्थानमखिलं कथयामि शृणुष्व तत् ॥ ४ ॥
ये ते द्वीपा मया प्रोक्ता जम्बुद्वीपादयो द्विज ।
पुष्करान्ता महाभाग शृणवेषां विस्तरं पुनः ॥ ५ ॥
द्वीपात्तु द्विगुणो द्वीपो जम्बुः प्लक्षोऽथ शाल्मलः ।
कुशः क्रौञ्चस्तथा शाकः पुष्करद्वीप एव च ॥ ६ ॥
लवणेक्षुसुरासर्पिर्द्दधिदुग्धजलाब्धिभिः ।
द्विगुणैर्द्विगुणैर्वृद्ध्या सर्व्वतः परिवेष्टिताः ॥ ७ ॥
जम्बुद्वीपस्य संस्थानं प्रवक्ष्येऽहं निबोध मे ।
लक्षमेकं योजनानां वृत्तो विस्तारदैर्घ्यतः ॥ ८ ॥
हिमवान् हेमकूटश्च ऋषभो मेरुरेव च ।
नीलः श्वेतस्तथा शृङ्गी सप्तास्मिन् वर्षपर्व्वताः ॥ ९ ॥
द्वौ लक्षयोजनायामौ मध्ये तत्र महाचलौ ।
तयोर्द्दक्षिणतो यौ तु यौ तथोत्तरतो गिरी ॥ १० ॥
दशभिर्द्दशभिर्न्यूनैः सहस्रैस्तैः परस्परं ।
द्विसाहस्रोच्छ्रयाः सर्व्वे तावद्विस्तारिणश्च ते ॥ ११ ॥
समुद्रान्तःप्रविष्टाश्च षड़स्मिन् वर्षपर्व्वताः ।
दक्षिणोत्तरतो निम्ना मध्ये तुङ्गायता क्षितिः ॥ १२ ॥

वेद्यर्द्धे दक्षिणे त्रीणि त्रीणि वर्षाणि चोत्तरे ।
इलावृतं तयोर्मध्ये चन्द्रार्द्धाकारवत् स्थितं ॥ १३ ॥
ततः पूर्व्वेण भद्राश्वं केतुमालञ्च पश्चिमे ।
इलावृतस्य मध्ये तु मेरुः कनकपर्व्वतः ॥ १४ ॥
चतुरसीतिसाहस्रस्तस्योच्छ्रायो महागिरेः ।
प्रविष्टः षोड़शाधस्तादिस्तीर्णः षोड़शैव तु ॥ १५ ॥
शरावसंस्थितत्वाच्च द्वात्रिंशन्मूर्द्धि विस्तृतः ।
शुक्लः पीतोऽसितो रक्तः प्राच्यादिषु यथाक्रमं ॥ १६ ॥
विप्रो वैश्यस्तथा शूद्रः क्षत्रियश्च सवर्णतः ।
तस्योपरि तथैवाष्टौ पूर्व्वादिषु यथाक्रमं ॥ १७ ॥
इन्द्रादिलोकपालानां तन्मध्ये ब्रह्मणः सभा ।
योजनानां सहस्राणि चतुर्द्दश समुच्छ्रिता ॥ १८ ॥
अयुतोच्छ्रायस्तस्याधस्तथा विष्कम्भपर्व्वतः ।
प्राच्यादिषु क्रमेणैव मन्दरो गन्धमादनः ॥ १९ ॥
विपुलश्च सुपार्श्वश्च केतुपादपशोभिताः ।
कदम्बो मन्दरे केतुर्जम्बुर्व्वै गन्धमादने ॥ २० ॥
विपुले च तथाश्वत्थः सुपार्श्वे च वटो महान् ।
एकादशशतायामा योजनानामिमे नगाः ॥ २१ ॥
जठरो देवकूटश्च पूर्व्वस्यां दिशि पर्व्वतौ ।
आनीलनिषधौ प्राप्तौ परस्परनिरन्तरौ ॥ २२ ॥
निषधः पारिपात्रश्च मेरोः पार्श्वे तु पश्चिमे ।
यथा पूर्व्वौ तथा तावानीलनिषधायतौ ॥ २३ ॥

कैलासो हिमवांश्चैव दक्षिणेन महाचलौ ।
पूर्व्वपश्चायतावेतावर्णवान्तर्व्यवस्थितौ ॥ २४ ॥
शृङ्गवान् जारुधिश्चैव तथैवोत्तरपर्व्वतौ ।
यथैव दक्षिणे तद्वदन्तर्वान्तर्व्यवस्थितौ ॥ २५ ॥
मर्यादपर्व्वता ह्येते कथ्यन्तेऽष्टौ द्विजोत्तम ।
हिमवद्धेमकूटादिपर्व्वतानां परस्परं ॥ २६ ॥
नव योजनसाहस्रं प्रागुदग्दक्षिणोत्तरं ।
मेरोरिलावृते तद्वदन्तरे वै चतुर्द्दिशं ॥ २७ ॥
फलानि यानि वै जम्बा गन्धमादनपर्व्वते ।
गजदेहप्रमाणानि पतन्ति गिरिमूर्द्धनि ॥ २८ ॥
तेषां स्रावात् प्रभवति ख्याता जम्बूनदीति वै ।
यत्र जाम्बूनदं नाम कनकं सम्प्रजायते ॥ २९ ॥
सा परिक्रम्य वै मेरुं जम्बूमूलं पुनर्नदी ।
विशति द्विजशार्दूल पीयमाना जनैश्च तैः ॥ ३० ॥
भद्राश्वेऽश्वशिरा विष्णुर्भारते कूर्म्मसंस्थितिः ।
वराहः केतुमाले च मत्स्यरूपस्तथोत्तरे ॥ ३१ ॥
तेषु नक्षत्रविन्यासाद्विषयाः समवस्थिताः ।
चतुर्ष्वपि द्विजश्रेष्ठ ग्रहाभिभवपाठकाः ॥ ३२ ॥

इति श्रीमार्कण्डेय पुराणे भुवनकोषे जम्बूद्वीपवर्णनं नाम ॥ ५४ ॥

पञ्चपञ्चाशोऽध्यायः ॥

मार्कण्डेय उवाच ॥

शैलेषु मन्दराद्येषु चतुर्ष्वेव द्विजोत्तम ।
वनानि यानि चत्वारि सरांसि च निबोध मे ॥ १ ॥
पूर्व्वं चैत्ररथं नाम दक्षिणे नन्दनं वनं ।
वैभ्राजं पश्चिमे शैले सावित्रं चोत्तराचले ॥ २ ॥
अरुणोदं सरः पूर्व्वं मानसं दक्षिणे तथा ।
शीतोदं पश्चिमे मेरोर्महाभद्रं तथोत्तरे ॥ ३ ॥
शीतार्त्तश्चक्रमुञ्जश्च कुलीरोऽथ सुकङ्कवान् ।
मणिशैलोऽथ वृषवान् महानीलो भवाचलः ॥ ४ ॥
सबिन्दुर्मन्दरो वेणुस्तामसो निषधस्तथा ।
देवशैलश्च पूर्व्वेण मन्दरस्य महाचलः ॥ ५ ॥
त्रिकूटशिखराद्रिश्च कलिङ्गोऽथ पतङ्गकः ।
रुचकः सानुमांश्चाद्रिस्ताम्रकोऽथ विशाखवान् ॥ ६ ॥
श्वेतोदरः समूलश्च वसुधारश्च रत्नवान् ।
एकशृङ्गो महाशैलो राजशैलः पिपाठकः ॥ ७ ॥
पञ्चशैलोऽथ कैलासो हिमवांश्चाचलोत्तमः ।
इत्येते दक्षिणे पार्श्वे मेरोः प्रोक्ता महाचलाः ॥ ८ ॥
सुरक्षः शिशिराक्षश्च वैदूर्य्यः कपिलस्तथा ।
पिञ्जरोऽथ महाभद्रः सुरसः कपिलो मधुः ॥ ९ ॥

अञ्जनः कुक्कुटः कृष्णः पाण्डरश्चाचलोत्तमः ।
सहस्रशिखरश्चाद्रिः पारियात्रः सशृङ्गवान् ॥ १० ॥
पश्चिमेन तथा मेरोर्विस्कम्भात् पश्चिमाद्बहिः ।
एतेऽचलाः समाख्याताः शृणुष्वान्यांस्तथोत्तरान् ॥ ११ ॥
शङ्खकूटोऽथ वृषभो हंसनाभस्तथाचलः ।
कपिलेन्द्रस्तथा शैलः सानुमान् नील एव च ॥ १२ ॥
स्वर्णशृङ्गी शातशृङ्गी पुष्पको मेघपर्व्वतः ।
विरजाक्षो वराहाद्रिर्मयूरो जारुधिस्तथा ॥ १३ ॥
इत्येते कथिता ब्रह्मन् मेरोरुत्तरतो नगाः ।
एतेषां पर्व्वतानान्तु द्रोण्योऽतीवमनोहराः ॥ १४ ॥
वनैरमलपानीयैः सरोभिरुपशोभिताः ।
तासु पुण्यकृतां जन्म मनुष्याणां द्विजोत्तम ॥ १५ ॥
एते भौमा द्विजश्रेष्ठ स्वर्गाः स्वर्गगुणाधिकाः ।
न तासु पुण्यपापानामपूर्व्वानामुपार्ज्जनं ॥ १६ ॥
पुण्योपभोगा एवोक्ता देवानामपि तास्वपि ।
शीतान्ताद्येषु चैतेषु शैलेषु द्विजसत्तम ॥ १७ ॥
विद्याधराणां यक्षाणां किन्नरोरगरक्षसां ।
देवानाञ्च महावासा गन्धर्व्वाणां च शोभनाः ॥ १८ ॥
महापुण्या मनोज्ञैश्च सदेवोपवनैर्युताः ।
सरांसि च मनोज्ञानि सर्व्वर्त्तुसुखदोऽनिलः ॥ १९ ॥
न चैतेषु मनुष्याणां वैमनस्यानि कुत्रचित् ।
तदेवं पार्थिवं पद्मं चतुष्पत्रं मयोदितं ॥ २० ॥

भद्राश्वभारताख्यानि पत्रान्यस्य चतुर्द्दिशं ।
भारतं नाम यद्वर्षं दक्षिणेन मयोदितं ॥ २१ ॥
तत् कर्म्मभूमिर्नान्यत्र संप्राप्तिः पुण्यपापयोः ।
एतत् प्रधानं विज्ञेयं यत्र सर्व्वं प्रतिष्ठितं ॥ २२ ॥
तस्मात् स्वर्गापवर्गौ च मानुष्यनारकावपि ।
तिर्य्यक्त्वमथवाप्यन्यत् नरः प्राप्नोति वै द्विज ॥ २३ ॥

इति श्रीमार्कण्डेयपुराणे भुवनकोषे ॥ ५५ ॥

षट्पञ्चाशोऽध्यायः ॥

मार्कण्डेय उवाच ॥

भवाधारं जगद्योनिं पदं नारायणस्य च ।
ततः प्रवृत्ता या देवी गङ्गा त्रिपथगामिनी ॥ १ ॥
सा प्रविश्य सुधायोनिं सोममाधारमम्भसां ।
ततः सम्बध्यमानार्करश्मिसङ्घातपावनी ॥ २ ॥
पपात मेरुपृष्ठे च सा चतुर्द्धा ततो ययौ ।
मेरुकूटतटान्तेभ्यो निपतन्ती विवर्त्तिता ॥ ३ ॥
विकीर्य्यमाणसलिला निरालम्बा पपात सा ।
मन्दरादिषु पादेषु प्रविभक्तोदका समं ॥ ४ ॥
चतुर्ष्वपि पपाताशु विभिन्नाद्रिशिलोच्चया ।
पूर्व्वा सीतेति विख्याता ययौ चैत्ररथं वनं ॥ ५ ॥

तत्प्लावयित्वा च ययौ वरुणोदं सरोवरं ।
शीतान्तञ्च गिरिं तस्मात्तस्यान्यान् गिरीन् क्रमात् ॥ ६ ॥
गत्वा भुवं समासाद्य भद्राश्वाज्जलधिं गता।
तथैवालकनन्दाख्यं दक्षिणे गन्धमादने ॥ ७ ॥
मेरुपादवनं गत्वा नन्दनं देवनन्दनं ।
मानसञ्च महावेगात् प्लावयित्वा सरोवरं ॥ ८ ॥
आसाद्य शैलराजानं रम्यं हि शिखरन्तथा ।
तस्माच्च पर्व्वतान् सर्व्वान् दक्षिणोपक्रमोदितान् ॥ ९ ॥
तान् प्लावयित्वा संप्राप्ता हिमवन्तं महागिरिं ।
दधार तत्र तां शम्भुर्न मुमोच वृषध्वजः ॥ १० ॥
भगीरथेनोपवासैः स्तुत्या चाराधितो विभुः ।
तत्र मुक्ता च शर्व्वेन सप्तधा दक्षिणोदधिं ॥ ११ ॥
प्रविवेश त्रिधा प्राच्यां प्लावयन्ती महानदी ।
भगीरथरथस्यानु स्रोतसैकेन दक्षिणां ॥ १२ ॥
तथैव पश्चिमे पादे विपुले सा महानदी ।
स्वरक्षुरिति विख्याता वैभ्राजं साचलं ययौ ॥ १३ ॥
शीतोदञ्च सरस्तस्मात् प्लावयन्ती महानदी ।
स्वरक्षुः पर्व्वतं प्राप्ता ततश्च त्रिशिखं गता ॥ १४ ॥
तस्मात् क्रमेण चाद्रीणां शिखरेषु निपत्य सा ।
केतुमालं समासाद्य प्रविष्टा लवणोदधिं ॥ १५ ॥
सुपार्श्वन्तु तथैवाद्रिं मेरुपादं हि सा गता ।
तत्र सोमेति विख्याता सा ययौ सवितुर्व्वनं ॥ १६ ॥

तत्पावयन्ती संप्राप्ता महाभद्रं सरोवरं ।
ततश्च शङ्खकूटं सा प्रयाता वै महानदी ॥ १७ ॥
तस्माच्च वृषभादीन् सा क्रमात् प्राप्य शिलोच्चयान् ।
महार्णवमनुप्राप्ता प्लावयित्वोत्तरान् कुरून् ॥ १८ ॥
एवमेषा मया गङ्गा कथिता ते द्विजर्षभ ।
जम्बुद्वीपनिवेशाश्च वर्षाणि च यथातथं ॥ १९ ॥
वसन्ति तेषु सर्व्वेषु प्रजाः किंपुरुषादिषु ।
सुखप्राया निरातङ्का न्यूनतोत्कर्षवर्ज्जिताः ॥ २० ॥
नवस्वपि च वर्षेषु सप्त सप्त कुलाचलाः ।
एकैकस्मिंस्तदा देशे नद्यश्चाद्रिविनिःसृताः ॥ २१ ॥
यानि किंपुरुषाद्यानि वर्षाण्यष्टौ द्विजोत्तम ।
तेषूद्भिदानि तोयानि मेघवार्य्येव भारते ॥ २२ ॥
वार्क्षी स्वाभाविकी देश्या तोयोत्था मानसी तथा ।
कर्म्मजा च नृणां सिद्धिर्व्वर्षेष्वेतेषु चाष्टसु ॥ २३ ॥
कामप्रदेभ्यो वृक्षेभ्यो वार्क्षी सिद्धिः स्वभावजा ।
स्वाभाविकी समाख्याता तृप्तिर्देश्या च देशिकी ॥ २४ ॥
अपां सौक्ष्म्याच्च तोयोत्था ध्यानोपेता च मानसी ।
उपासनादिकार्य्यात्तु कर्म्मजा साप्युदाहृता ॥ २५ ॥
न चैतेषु युगावस्था नाधयो व्याधयो न च ।
पुण्यापुण्यसमारम्भो नैव तेषु द्विजोत्तम ॥ २६ ॥

इति श्रीमार्कण्डेयपुराणे गङ्गावतारो नाम ॥ ५६ ॥

सप्तपञ्चाशोऽध्यायः ॥

क्रौष्टुकिरुवाच ॥

भगवन् कथितन्त्वेतज्जम्बुद्वीपं समासतः ।
यदेतद्भवता प्रोक्तं कर्म्म नान्यत्र पुण्यदं ॥ १ ॥
पापाय वा महाभाग वर्ज्जयित्वा तु भारतं ।
इतः स्वर्गश्च मोक्षश्च मध्यञ्चान्तञ्च गम्यते ॥ २ ॥
न खल्वन्यत्र मर्त्त्यानां भूमौ कर्म्म विधीयते ।
तस्माद्विस्तरशो ब्रह्मन् ममैतद्भारतं वद ॥ ३ ॥
ये चास्य भेदा यावन्तो यथावत् स्थितिरेव च ।
वर्षोऽयं द्विजशार्द्दूल ये चास्मिन् देशपर्व्वताः ॥ ४ ॥

मार्कण्डेय उवाच ॥

भारतस्यास्य वर्षस्य नव भेदान्निबोध मे ।
समुद्रान्तरिता ज्ञेयास्ते त्वगम्याः परस्परं ॥ ५ ॥
इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान् ।
नागद्वीपस्तथा सौम्यो गान्धर्व्वो वारुणस्तथा ॥ ६ ॥
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ।
योजनानां सहस्रं वै द्वीपोऽयं दक्षिणोत्तरात् ॥ ७ ॥
पूर्व्वे किराता यस्यान्ते पश्चिमे यवनास्तथा ।
ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राश्चान्तःस्थिता द्विज ॥ ८ ॥
इज्याध्यायवणिज्याद्यैः कर्म्मभिः कृतपावनाः ।
तेषां संव्यवहारश्च एभिः कर्म्मभिरिष्यते ॥ ९ ॥

स्वर्गापवर्गप्राप्तिश्च पुण्यं पापञ्च वै तदा ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ॥ १० ॥
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः ।
तेषां सहस्रशश्चान्ये भूधरा ये समीपगाः ॥ ११ ॥
विस्तारोच्छ्रयिणो रम्या विपुलाश्चात्र सानवः ।
कोलाहलः सवैभ्राजो मन्दरो दर्दुराचलः ॥ १२ ॥
वातस्वनो वैद्युतश्च मैनाकः स्वरसस्तथा ।
तुङ्गप्रस्थो नागगिरी रोचनः पाण्डराचलः ॥ १३ ॥
पुष्पो गिरिर्दुर्ज्जयन्तो रैवतोऽर्व्वुद एव च ।
ऋष्यमूकः सगोमन्तः कूटशैलः कृतस्मरः ॥ १४ ॥
श्रीपर्व्वतश्च कोरश्च शतशोऽन्ये च पर्व्वताः ।
तैर्विमिश्रा जनपदा म्लेच्छाश्चार्य्याश्च भागशः ॥ १५ ॥
तैः पीयन्ते सरित्श्रेष्ठा यास्ताः सम्यङ्निबोध मे ।
गङ्गा सरस्वती सिन्धुश्चन्द्रभागा तथापरा ॥ १६ ॥
यमुना च शतद्रुश्च वितस्तैरावती कुहुः ।
गोमती धूतपापा च बाहुदा सदृशद्वती ॥ १७ ॥
विपाशा देविका रंक्षुर्निश्चीरा गण्डकी तथा ।
कौशिकी चापगा विप्र हिमवत्पादनिःसृताः ॥ १८ ॥
वेदस्मृतिर्व्वेदवती वृत्रघ्नी सिन्धुरेव च ।
वेणा सानन्दनी चैव सदानीरा मही तथा ॥ १९ ॥
पारा चर्म्मण्वती नूपी विदिशा वेत्रवत्यपि ।
शिप्रा ह्यवर्णी च तथा पारिपात्राश्रयाः स्मृताः ॥ २० ॥

शोणो महानदश्चैव नर्म्मदा सुरथाऽद्रिजा ।
मन्दाकिनी दशार्णा च चित्रकूटा तथापरा ॥ २१ ॥
चित्रोत्पला सतमसा करमोदा पिशाचिका ।
तथान्या पिप्पलिश्रोणिर्विपाशा वञ्जुला नदी ॥ २२ ॥
सुमेरुजा शुक्तिमती शकुली त्रिदिवाक्रमुः ।
ऋक्षपादप्रसूता वै तथान्या वेगवाहिनी ॥ २३ ॥
शिप्रा पयोष्णी निर्विन्ध्या तापी सनिषधावती ।
वेण्या वैतरणी चैव सिनीवाली कुमुद्वती ॥ २४ ॥
करतोया महागौरी दुर्गा चान्तःशिरा तथा ।
विन्ध्यपादप्रसूतास्ता नद्यः पुण्यजलाः शुभाः ॥ २५ ॥
गोदावरी भीमरथा कृष्णा वेण्या तथापरा ।
तुङ्गभद्रा सुप्रयोगा वाह्या कावेर्यथापगा ॥ २६ ॥
विन्ध्यपादविनिष्क्रान्ता* इत्येताः सरिदुत्तमाः ।
कृतमाला ताम्रपर्णी पुष्पजा सूत्पलावती ॥ २७ ॥
मलयाद्रिसमुद्भूता नद्यः शीतजलास्त्विमाः ।
पितृसोमर्षिकुल्या च इक्षुका त्रिदिवा च या ॥ २८ ॥
लाङ्गूलिनी वंशकरा महेन्द्रप्रभवाः स्मृताः ।
ऋषिकुल्या कुमारी च मन्दगा मन्दवाहिनी ॥ २९ ॥
कृपा पलाशिनी चैव शुक्तिमत्प्रभवाः स्मृताः ।
सर्व्वाः पुण्याः सरस्वत्यः सर्व्वा गङ्गाः समुद्रगाः ॥ ३० ॥

---

* सह्यपादविनिष्क्रान्ता इति पाठान्तरः ।

विश्वस्य मातरः सर्व्वाः सर्व्वपापहराः स्मृताः ।
अन्याः सहस्रशश्चोक्ताः क्षुद्रनद्यो द्विजोत्तम ॥ ३१ ॥
प्रावृट्कालवहाः सन्ति सदाकालवहाश्च याः ।
मत्स्याश्वकूटाः कुल्याश्च कुन्तलाः काशिकोशलाः ॥ ३२ ॥
अथर्वाश्चार्कलिङ्गाश्च मलकाश्च वृकैः सह ।
मध्यदेश्या जनपदाः प्रायशोऽमी प्रकीर्त्तिताः ॥ ३३ ॥
सह्यस्य चोत्तरे यास्तु यत्र गोदावरी नदी ।
पृथिव्यामपि कृत्स्नायां स प्रदेशो मनोरमः ॥ ३४ ॥
गोवर्द्धनं पुरं रम्यं भार्गवस्य महात्मनः ।
वाह्लीका वाटधानाश्च आभीराः कालतोयकाः ॥ ३५
अपरान्ताश्च शूद्राश्च पह्लवाश्चर्म्मखण्डिकाः ।
गान्धारा गवलाश्चैव सिन्धुसौवीरमद्रकाः ॥ ३६ ॥
शतद्रुजाः कलिङ्गाश्च पारदा हारभूषिकाः ।
माठरा बहुभद्राश्च कैकेया दशमालिकाः ॥ ३७ ॥
क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च ।
काम्बोजा दरदाश्चैव बर्व्वरा हर्षवर्द्धनाः ॥ ३८ ॥
चीनाश्चैव तुषाराश्च बहुला बाह्यतोनराः ।
आत्रेयाश्च भरद्वाजाः पुष्कलाश्च कशेरुकाः ॥ ३९ ॥
लम्पाकाः शूलकाराश्च चुलिका जागुडैः सह ।
औषधाश्चानिभद्राश्च किरातानाञ्च जातयः ॥ ४० ॥
तामसा हंसमार्गाश्च काश्मीरास्तुङ्गणास्तथा ।
शूलिकाः कुहकाश्चैव ऊर्णा दर्व्वास्तथैव च ॥ ४१ ॥

एते देशा ह्युदीच्यास्तु प्राच्यान्देशान्निबोध मे ।
अध्रारका मुद्करा अन्तर्गिर्य्या बहिर्गिराः ॥ ४२ ॥
तथा प्रवङ्गा रङ्गेया मानदा मानवर्त्तिकाः ।
ब्रह्मोत्तराः प्रविजया भार्गवा ज्ञेयमल्लकाः ॥ ४३ ॥
प्राग्ज्योतिषाश्च मद्राश्च विदेहास्ताम्रलिप्तकाः ।
मल्ला मगधगोमन्ताः प्राच्या जनपदाःस्मृताः ॥ ४४ ॥
अथापरे जनपदा दक्षिणापथवासिनः ।
पुण्ड्राश्च केवलाश्चैव गोलाङ्गूलास्तथैव च ॥ ४५ ॥
शैलूषा मूषिकाश्चैव कुसुमा नाम वासकाः ।
महाराष्ट्रा माहिषका कलिङ्गाश्चैव सर्व्वशः ॥ ४६ ॥
आभीराः सह वैशिक्या आढक्याः शबराश्च ये ।
पुलिन्दा विन्ध्यमौलेया वैदर्भा दण्डकैःसह ॥ ४७ ॥
पौरिका मौलिकाश्चैव अश्मका भोगवर्द्धनाः ।
नैषिकाः कुन्तला अन्ध्रा उद्भिदा वनदारकाः ॥ ४८ ॥
दाक्षिणात्यास्त्वमी देशा अपरान्तान् निबोध मे ।
सूर्य्यारकाः कालिवला दुर्गाश्चानीकटैःसह ॥ ४९ ॥
पुलिन्दाश्च सुमीनाश्च रूपपाः स्वापदैः सह ।
तथा कुरुमिनश्चैव सर्व्वे चैव कठाक्षराः ॥ ५० ॥
नासिक्यावाश्च ये चान्ये ये चैवोत्तरनर्म्मदाः ।
भीरुकच्छाः समाहेयाः सह सारस्वतैरपि ॥ ५१ ॥
काश्मीराश्च सुराष्ट्राश्च आवन्त्याश्चार्बुदैः सह ।
इत्येते ह्यपरान्ताश्च शृणु विन्ध्यनिवासिनः ॥ ५२ ॥

मरजाश्च करूषाश्च केरलाश्चोत्कलैः सह ।
उत्तमर्णा दशार्णाश्च भोज्याः किष्किन्धकैः सह ॥ ५३ ॥
तोशलाः कोशलाश्चैव त्रैपुरा वैदिशास्तथा ।
तुम्बुरास्तुम्बुलाश्चैव पटवो नैषधैः सह ॥ ५४ ॥
अन्नजास्तुष्टिकाराश्च वीरहोत्रा ह्यवन्तयः ।
एते जनपदाः सर्व्वे विन्ध्यपृष्ठनिवासिनः ॥ ५५ ॥
अतो देशान् प्रवक्ष्यामि पर्व्वताश्रयिणश्च ये ।
नीहारा हंसमार्गाश्च कुरवो गुर्गणाः खसाः ॥ ५६ ॥
कुन्तप्रावरणाश्चैव ऊर्णा दार्व्वाः सकूचकाः ।
त्रिगर्त्ता गालवाश्चैव किरातास्तामसैः सह ॥ ५७ ॥
कृतत्रेतादिकश्चात्र चतुर्युगकृतो विधिः ।
एवन्तु भारतं वर्षं चतुःसंस्थानसंस्थितं ॥ ५८ ॥
दक्षिणापरतो ह्यस्य पूर्व्वेण च महोदधिः ।
हिमवानुत्तरेणास्य कार्म्मुकस्य यथा गुणः ॥ ५९ ॥
तदेतद्भारतं वर्षं सर्व्वबीजं द्विजोत्तम ।
ब्रह्मत्वममरेशत्वं देवत्वं मरुतस्तथा ॥ ६० ॥
मृगपक्ष्यप्सरोयोनिस्तद्वत्सर्व्वे सरीसृपाः ।
स्थावराणाञ्च सर्व्वेषामितो ब्रह्मन् शुभाशुभैः ॥ ६१ ॥
प्रयाति कर्म्मभूर्ब्रह्मन् नान्या लोकेषु विद्यते ।
देवानामपि विप्रर्षे सदा एष मनोरथः ॥ ६२ ॥
अपि मानुष्यमाप्स्यामो देवत्वात्प्रच्युताः क्षितौ ।
मनुष्यः कुरुते तत्तु यन्न शक्यं सुरासुरैः ॥ ६३ ॥

तत्कर्म्मनिगडग्रस्तैः स्वकर्म्मख्यापनोत्सुकैः ।
न किञ्चित् क्रियते कर्म्म सुखलेशोपबृंहितैः ॥ ६४ ॥

इति श्रीमार्कण्डेयपुराणे नद्यादिवर्णनो नाम ॥ ५७ ॥

अष्टपञ्चाशोऽध्यायः ॥

क्रौष्टुकिरुवाच ॥

भगवन् कथितं सम्यक् भवता भारतं मम ।
सरितः पर्व्वता देशा ये च तत्र वसन्ति वै ॥ १ ॥
किन्तु कूर्म्मस्त्वया पूर्व्वं भारते भगवान् हरिः ।
कथितस्तस्य संस्थानं श्रोतुमिच्छाम्यशेषतः ॥ २ ॥
कथं स संस्थितो देवः कूर्म्मरूपी जनार्द्दनः ।
शुभाशुभं मनुष्याणां व्यज्यते च ततः कथं ॥
यथामुखं यथापादन्तस्य तद्ब्रूह्यशेषतः ॥ ३ ॥

मार्कण्डेय उवाच ॥

प्राङ्मुखो भगवान् देवः कूर्म्मरूपी व्यवस्थितः ।
आक्रम्य भारतं वर्षं नवभेदमिमं द्विज ॥ ४ ॥
नवधा संस्थितान्यस्य नक्षत्राणि समन्ततः ।
विषयाश्च द्विजश्रेष्ठ ये सम्यक् तान्निबोध मे ॥ ५ ॥
वेदमन्त्रा विमाण्डव्याः शाल्वनीपास्तथा शकाः ।
उज्जिहानास्तथा वत्सा घोषसंख्यास्तथा खसाः ॥ ६ ॥

मध्ये सारस्वता मत्स्याः शूरसेनाः समाथुराः ।
धर्म्मारण्या ज्योतिषिका गौरग्रीवा गुडाश्मकाः ॥ ७ ॥
वैदेहकाः सपाञ्चालाः संकेताः कङ्कमारुताः ।
कालकोटिसपाषण्डाः पारिपात्रनिवासिनः ॥ ८ ॥
कापिङ्गलाः कुरुर्वाह्यास्तथैवोडुम्बरा जनाः ।
गजाह्वयाश्च कूर्म्मस्य जलमध्यनिवासिनः ॥ ९ ॥
कृत्तिका रोहिणी सौम्या एतेषां मध्यवासिनां ।
नक्षत्रत्रितयं विप्र शुभाशुभविपाटकं ॥ १० ॥
वृषध्वजोऽञ्जनश्चैव जम्बुाख्यो मानवाचलः ।
सूर्पकर्णो व्याघ्रमुखः खर्म्मकः कर्व्वटाशनः ॥ ११ ॥
तथा चन्द्रेश्वराश्चैव खशाश्च मगधास्तथा ।
गिरयो मैथिलाः शुभ्रास्तथा वदनदन्तुराः ॥ १२ ॥
प्राग्ज्योतिषाः सलौहित्याः सामुद्राः पुरुषादकाः ।
पूर्णोत्कटो भद्रगौरस्तथोदयगिरिर्द्विज ॥ १३ ॥
कषाया मेखलामुष्टास्ताम्रलिप्तैकपादपाः ।
वर्द्धमानाः कोशलाश्च मुखे कूर्म्मस्य संस्थिताः ॥ १४ ॥
रौद्रः पुनर्व्वसुः पुष्यो नक्षत्रत्रितयं मुखे ।
पादे तु दक्षिणे देशाः क्रोष्टुके वदतः शृणु ॥ १५ ॥
कलिङ्गवङ्गजठराः कोशला मूषिकास्तथा ।
चेदयश्चोर्द्ध्वकर्णाश्च मत्स्याद्या विन्ध्यवासिनः ॥ १६ ॥
विदर्भा नारिकेलाश्च धर्म्मद्वीपास्तथैलिकाः ।
व्याघ्रग्रीवा महाग्रीवास्त्रैपुराः श्मश्रुधारिणः ॥ १७ ॥

कैलिन्ध्या हैमकूटाश्च निषधाः कटकस्थलाः ।
दशार्णाहारिका नग्ना निषादाः काकुलालकाः ॥ १८ ॥
तथैव पर्णशबराः पादे वै पूर्व्वदक्षिणे ।
अश्लेषर्क्षं तथा पैत्र्यं फाल्गुन्यः प्रथमास्तथा ॥ १९ ॥
नक्षत्रत्रितयं पादमाश्रितं पूर्व्वदक्षिणं ।
लङ्का कालाजिनाश्चैव शैलिका निकटास्तथा ॥ २० ॥
महेन्द्रमलयाद्रौ च दर्दुरे च वसन्ति ये ।
कर्कोटकवने ये च भृगुकच्छाः सकोङ्कनाः ॥ २१ ॥
सर्व्वाश्चैव तथाभीरा वेणयास्तीरनिवासिनः ।
अवन्त्या दासपुरास्तथैवाकणिनो जनाः ॥ २२ ॥
महाराष्ट्राः सकर्णाटा गोनर्द्धाश्चित्रकूटकाः ।
चोलाः कोलगिराश्चैव क्रौञ्चद्वीपजटाधराः ॥ २३ ॥
कावेरी ऋष्यमूकस्था नासिक्याश्चैव ये जनाः ।
शङ्खशुक्त्यादिवैदूर्य्यशैलप्रान्तचराश्च ये ॥ २४ ॥
तथा वारिचराः कोलाः चर्म्मपट्टनिवासिनः ।
गणवाह्याःपराः कृष्णाद्वीपवासनिवासिनः ॥ २५ ॥
सूर्य्याद्रौ कुमुदाद्रौ च ते वसन्ति तथा जनाः ।
औखावनाः सपिशिकास्तथा ये कर्म्मनायकाः ॥ २६ ॥
दक्षिणाः कौरुषा ये च ऋषिकास्तापसाश्रमाः ।
ऋषभाः सिंहलाश्चैव तथा काञ्चीनिवासिनः ॥ २७ ॥
तिलङ्गाः कुञ्जरदरीकच्छवासाश्च ये जनाः ।
ताम्रपर्णी तथा कुक्षिरिति कूर्म्मस्य दक्षिणः ॥ २८ ॥

फाल्गुन्यश्चोत्तरा हस्ता चित्रा चर्क्षत्रयं द्विज ।
कूर्मस्य दक्षिणे कुक्षौ बाह्यपादस्तथापरं ॥ २९ ॥
काम्बोजाः पह्लवाश्चैव तथैव वडवामुखाः ।
तथा च सिन्धुसौवीराः सानर्त्ता वनितामुखाः ॥ ३० ॥
द्रावणाः सार्गिगाः शूद्राः कर्णप्राधेयबर्व्वराः ।
किराताः पारदाः पाण्ड्यास्तथा पारशवाः कलाः ॥ ३१ ॥
धूर्त्तका हैमगिरिकाः सिन्धुकालककैरताः ।
सौराष्ट्रा दरदाश्चैव द्राविडाश्च महार्णवाः ॥ ३२ ॥
एते जनपदाः पादे स्थिता वै दक्षिणेऽपरे ।
स्वात्यो विशाखा मैत्रञ्च नक्षत्रत्रयमेव च ॥ ३३ ॥
मणिमेघः क्षुराद्रिश्च खञ्जनोऽस्तगिरिस्तथा ।
अपरान्तिका हैहयाश्च शान्तिका विप्रशस्तकाः ॥ ३४ ॥
कोकङ्कणाः पञ्चदका वमना ह्यवरा स्तथा ।
तारक्षुरा अङ्गतकाः शर्कराः शाल्मवेश्मकाः ॥ ३५ ॥
गुरुस्वराः फल्गुणका वेणुमत्याञ्च ये जनाः ।
तथा फल्गुलुका घोरा गुरुहाश्च कलास्तथा ॥ ३६ ॥
एकेक्षणा वाजिकेशा दीर्घग्रीवाः सचूलिकाः ।
अश्वकेशास्तथा पुच्छे जनाः कूर्मस्य संस्थिताः ॥ ३७ ॥
ऐन्द्रं मूलन्तथाषाढा नक्षत्रत्रयमेव च ।
माण्डव्याश्चण्डखाराश्च अश्वकालनतास्तथा ॥ ३८ ॥
कुन्यतालडहाश्चैव स्त्रीबाह्या बालिकास्तथा ।
नृसिंहा वेणुमत्याञ्च बलावस्थास्तथापरे ॥ ३९ ॥

धर्म्मारण्यास्तथा सुका उरुकर्म्मस्थिता जनाः ।
वामपादे जनाः पार्श्वे स्थिताः कूर्म्मस्य भार्गवे ॥ ४० ॥
आषाढाश्रवणे चैव धनिष्ठा यत्र संस्थिता ।
कैलासो हिमवांश्चैव धनुष्मान् वसुमांस्तथा ॥ ४१ ॥
क्रौञ्चाः कुरुवकाश्चैव क्षुद्रवीणाश्च ये जनाः ।
रसालयाः सकैकेया भोगप्रस्थाः सयामुनाः ॥ ४२ ॥
अन्तर्द्वीपास्त्रिगर्त्ताश्च अग्नीज्याः सार्द्दना जनाः ।
तथैवाश्वमुखाः प्राप्ताश्चिविडाः केशधारिणः ॥ ४३ ॥
दासेरका वाटधानाः शवधानास्तथैव च ।
पुष्कलाधमकैरातास्तथा तक्षशिलाश्रयाः ॥ ४४ ॥
अम्बाला मालवा मद्रा वेणुकाः सवदन्तिकाः ।
पिङ्गला मानकलहा हूणाः कोहलकास्तथा ॥ ४५ ॥
माण्डव्या भूतियुवकाः शातका हेमतारकाः ।
यशोमत्याः सगान्धाराः खरसागरराशयः ॥ ४६ ॥
यौधेया दासमेयाश्च राजन्याः श्यामकास्तथा ।
क्षेमधूर्त्ताश्च कूर्म्मस्य वामकुक्षिमुपाश्रिताः ॥ ४७ ॥
वारुणञ्चात्र नक्षत्रं तत्र प्रौष्ठपदाद्वयं ।
येन किन्नरराज्यञ्च पशुपालं सकीचकं ॥ ४८ ॥
काश्मीरकं तथा राष्ट्रमभिसारजनस्तथा ।
दरदास्त्वङ्गनाश्चैव कुलटा वनराष्ट्रकाः ॥ ४९ ॥
सैरिष्ठा ब्रह्मपुरकास्तथैव वनवाह्यकाः ।
किरातकौशिकानन्दा जनाः पह्लवलोलनाः ॥ ५० ॥

दार्वादा मरकाश्चैव कुरटाश्चान्नदारकाः ।
एकपादाः खशा घोषाः स्वर्गभौमानवद्यकाः ॥ ५१ ॥
तथा सयवना हिङ्गाश्चीरप्रावरणाश्च ये ।
त्रिनेत्राः पौरवाश्चैव गन्धर्व्वाश्च द्विजोत्तम ॥ ५२ ॥
पूर्व्वोत्तरन्तु कूर्म्मस्य पादमेते समाश्रिताः ।
रेवत्याश्चाश्विदैवत्यं याम्यञ्चर्क्षमिति त्रयं ॥ ५३ ॥
तत्र पादे समाख्यातं पाकाय मुनिसत्तम ।
देशेष्वेतेषु चैतानि नक्षत्राण्यपि वै द्विज ॥ ५४ ॥
एतत्पीड़ा अमी देशाः पीड्यन्ते ये क्रमोदिताः ।
यान्ति चाभ्युदयं विप्र ग्रहैः सम्यगवस्थितैः ॥ ५५ ॥
यस्यर्क्षस्य पतिर्यो वै ग्रहस्तद्भावितो भयं ।
तद्देशस्य मुनिश्रेष्ठ तदुत्कर्षे शुभागमः ॥ ५६ ॥
प्रत्येकं देशसामान्यं नक्षत्रग्रहसम्भवं ।
भयं लोकस्य भवति शोभनं वा द्विजोत्तम ॥ ५७ ॥
स्वर्क्षैरशोभनैर्जन्तोः सामान्यमिति भीतिदं ।
ग्रहैर्भवति पीडोत्थमल्पायासमशोभनं ॥ ५८ ॥
तथैव शोभनः पाको दुःस्थितैश्च तथा ग्रहैः ।
अल्पोपकाराय नृणां देशर्क्षैश्चात्मनो बुधैः ॥ ५९ ॥
द्रव्ये गोष्ठेऽथ भृत्येषु सुहृत्सु तनयेषु वा ।
भार्य्यायाञ्च ग्रहे दुःस्थे भयं पुण्यवतां नृणां ॥ ६० ॥
आत्मन्यथाल्पपुण्यानां सर्व्वत्रैवातिपापिनां ।
नैकत्रापि ह्यपापानां भयमस्ति कदाचन ॥ ६१ ॥

दिग्देशजनसामान्यं नृपसामान्यमात्मजं ।
नक्षत्रग्रहसामान्यं नरो भुङ्क्ते शुभाशुभं ॥ ६२ ॥
परस्पराभिरक्षा च ग्रहादौस्थ्येन जायते ।
एतेभ्य एव विप्रेन्द्र शुभहानिस्तथाशुभैः ॥ ६३ ॥
यदेतत्कूर्म्मसंस्थानं नक्षत्रेषु मयोदितं ।
एतत्तु देशसामान्यमशुभं शुभमेव च ॥ ६४ ॥
तस्माद्विज्ञाय देशर्क्षं ग्रहपीडान्तथात्मनः ।
कुर्व्वीत शान्तिं मेधावी लोकवादांश्च सत्तम ॥ ६५ ॥
आकाशाद्देवतानाञ्च दैत्यादीनाञ्च दौर्हृदाः ।
पृथ्व्यां पतन्ति ते लोके लोकवादा इति श्रुताः ॥ ६६ ॥
तां तथैव बुधः कुर्य्यात् लोकवादान्न हापयेत् ।
तेषान्तत्करणान्नॄणां युक्तो दुष्टागमक्षयः ॥ ६७ ॥
शुभोदयं प्रहानिञ्च पापानां द्विजसत्तम ।
प्रज्ञाहानिं प्रकुर्य्युस्ते द्रव्यादीनाञ्च कुर्व्वते ॥ ६८ ॥
तस्माच्छान्तिपरः प्राज्ञो लोकवादरतस्तथा ।
लोकवादांश्च शान्तीश्च ग्रहपीडासु कारयेत् ॥ ६९ ॥
अद्रोहानुपवासांश्च शस्तं चैत्यादिवन्दनं ।
जपं होमं तथा दानं स्नानं क्रोधादिवर्ज्जनं ॥ ७० ॥
अद्रोहः सर्व्वभूतेषु मैत्रीं कुर्य्याच्च पण्डितः ।
वर्ज्जयेदसतीं वाचमतिवादांस्तथैव च ॥ ७१ ॥
ग्रहपूजाञ्च कुर्व्वीत सर्व्वपीडासु मानवः ।
एवं शाम्यन्त्यशेषाणि घोराणि द्विजसत्तम ॥ ७२ ॥

प्रयतानां मनुष्याणां ग्रहर्क्षोत्थान्यशेषतः ।
एष कूर्म्मो मया ख्यातो भारते भगवान् विभुः ॥ ७३ ॥
नारायणो ह्यचिन्त्यात्मा यत्र सर्व्वं प्रतिष्ठितं ।
तत्र देवाःस्थिताः सर्व्वे प्रतिनक्षत्रसंश्रयाः ॥ ७४ ॥
तथा मध्ये हुतवहः पृथ्वी सोमश्च वै द्विज ।
मेषादयस्त्रयो मध्ये मुखे द्वौ मिथुनादिकौ ॥ ७५ ॥
प्राग्दक्षिणे तथा पादे कर्किसिंहौ व्यवस्थितौ ।
सिंहकन्यातुलाश्चैव कुक्षौ राशित्रयं स्थितं ॥ ७६ ॥
तुलाथ वृश्चिकश्चोभौ पादे दक्षिणपश्चिमे ।
पृष्ठे च वृश्चिकेनैव सह धन्वी व्यवस्थितः ॥ ७७ ॥
वायव्ये चास्य वै पादे धनुर्ग्राहादिकं त्रयं ।
कुम्भमीनौ तथैवास्य उत्तरां कुक्षिमाश्रितौ ॥ ७८ ॥
मीनमेषौ द्विजश्रेष्ठ पादे पूर्व्वोत्तरे स्थितौ ।
कूर्म्मे देशास्तथर्क्षाणि देशेष्वेतेषु वै द्विज ॥ ७९ ॥
राशयश्च तथर्क्षेषु ग्रहराशिष्ववस्थिताः ।
तस्माद्ग्रहर्क्षपीडासु देशपीडां विनिर्दिशेत् ॥ ८० ॥
तत्र स्नात्वा प्रकुर्व्वीत दानहोमादिकं विधिं ।
स एष वैष्णवः पादो ब्रह्मा मध्ये ग्रहस्य यः ॥ ८१ ॥

इति श्रीमार्कण्डेयपुराणे कूर्म्मनिवेशो नाम ॥ ५८ ॥

ऊनषष्टितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

एवन्तु भारतं वर्षं यथावत् कथितं मुने ।
कृतं त्रेता द्वापरञ्च तथा तिष्यचतुष्टयं ॥ १ ॥
अत्रैवैतद्युगानान्तु चातुर्व्वर्ण्योऽत्र वै द्विज ।
चत्वारि त्रीणि द्वे चैव तथैकञ्च शरच्छतं ॥ २ ॥
जीवन्त्यत्र नरा ब्रह्मन् कृतत्रेतादिके क्रमात् ।
देवकूटस्य पूर्व्वस्य शैलेन्द्रस्य महात्मनः ॥ ३ ॥
पूर्व्वेण यत् स्थितं वर्षं भद्राश्वं तन्निबोध मे ।
श्वेतपर्णश्च नीलश्च शैवालश्चाचलोत्तमः ॥ ४ ॥
कौरञ्जः पर्णशालाग्रः पञ्चैते तु कुलाचलाः ।
तेषां प्रसूतिरन्ये ये बहवः क्षुद्रपर्व्वताः ॥ ५ ॥
तैर्व्विशिष्टा जनपदा नानारूपाः सहस्रशः ।
ततः कुमुदसंकाशाः शुद्धसानुसमंगलाः ॥ ६ ॥
इत्येवमाद्योऽन्येऽपि शतशोऽथ सहस्रशः ।
शीता शंखावती भद्रा चक्रावर्त्तादिकास्तथा ॥ ७ ॥
नद्योऽथ बह्वयो विस्तीर्णाः शीततोयौघवाहिकाः ।
अत्र वर्षे नराः शङ्खशुद्धहेमसमप्रभाः ॥ ८ ॥
दिव्यसङ्गमिनः पुण्या दशवर्षशतायुषः ।
अधमोत्तमौ न तेषु स्तः सर्व्वे ते समदर्शनाः ॥ ९ ॥

तितिक्षादिभिरष्टाभिः प्रकृत्या ते गुणैर्युताः ।
तत्राप्यश्वशिरा देवश्चतुर्बाहुर्ज्जनार्द्दनः ॥ १० ॥
शिरोहृदयमेढ्राङ्घ्रिहस्तैश्चाक्षिचयान्वितः ।
तस्याप्यथैवं विषया विज्ञेया जगतः प्रभोः ॥ ११ ॥
केतुमालमतो वर्षं निबोध मम पश्चिमं ।
विशाखः कम्बलः कृष्णो जयन्तो हरिपर्व्वतः ॥ १२ ॥
विशोको वर्द्धमानश्च सप्तैते कुलपर्व्वताः ।
अन्ये सहस्रशः शैला येषु लोकगणाः स्थिताः ॥ १३ ॥
मौलयस्ते महाकायाः शाकपोतकरम्भकाः ।
अङ्गुलप्रमुखाश्चापि वसन्ति शतशो जनाः ॥ १४ ॥
ये पिबन्ति महानद्यो वंक्षुं श्यामां स्वकम्बलां ।
अमोघां कामिनीं श्यामां तथैवान्याः सहस्रशः ॥ १५ ॥
अत्राप्यायुः समं पूर्व्वैरत्रापि भगवान् हरिः ।
वराहरूपी पादास्यहृत्पृष्ठपार्श्वतस्तथा ॥ १६ ॥
त्रिनक्षत्रयुते देशे नक्षत्राणि शुभानि च ।
इत्येतत् केतुमालन्ते कथितं मुनिसत्तम ॥ १७ ॥
अतःपरं कुरून् वक्ष्ये निबोधेह ममोत्तरान् ।
तत्र वृक्षा मधुफला नित्यपुष्पफलोपगाः ॥ १८ ॥
वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च ।
सर्व्वकामप्रदास्ते हि सर्व्वकामफलप्रदाः ॥ १९ ॥
भूमिर्मणिमयी वायुः सुगन्धः सर्व्वदा सुखः ।
जायन्ते मानवास्तत्र देवलोकपरिच्युताः ॥ २० ॥

मिथुनानि प्रसूयन्ते समकालस्थितानि वै ।
अन्योन्यमनुरक्तानि चक्रवाकोपमानि च ॥ २१ ॥
चतुर्दशसहस्राणि तेषां सार्द्धानि वै स्थितिः ।
चन्द्रकान्तश्च शैलेन्द्रः सूर्य्यकान्तस्तथापरः ॥ २२ ॥
तस्मिन् कुलाचलौ वर्षे तन्मध्ये च महानदी ।
भद्रसोमा प्रयात्युर्व्यां पुण्यामलजलौघिनी ॥ २३ ॥
सहस्रशस्तथैवान्या नद्यो वर्षेऽपि चोत्तरे ।
तथान्याः क्षीरवाहिन्यो घृतवाहिन्य एव च ॥ २४ ॥
दध्नो ह्रदास्तथा तत्र तथान्ये चानुपर्व्वताः ।
अमृतास्वादकल्पानि फलानि विविधानि च ॥ २५ ॥
वनेषु तेषु वर्षेषु शतशोऽथ सहस्रशः ।
तत्रापि भगवान् विष्णुः प्राक्शिरा मत्स्यरूपवान् ॥ २६ ॥
विभक्तो नवधा विप्र नक्षत्राणां त्रयं त्रयं ।
दिशस्तथापि नवधा विभक्ता मुनिसत्तम ॥ २७ ॥
चन्द्रद्वीपः समुद्रे च भद्रद्वीपस्तथापरः ।
तत्रापि पुण्यो विख्यातः समुद्रान्तर्महामुने ॥ २८ ॥
इत्येतत् कथितं ब्रह्मन् कुरुवर्षं मयोत्तरं ।
शृणु किंपुरुषादीनि वर्षाणि गदतो मम ॥ २९ ॥

इति श्रीमार्कण्डेयपुराणे उत्तरकुरुकथनं ॥ ५९ ॥

षष्टितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

यत्तु किम्पुरुषं वर्षं तत्प्रवक्ष्याम्यहं द्विज ।
यत्रायुर्दशसाहस्रं पुरुषाणां वपुष्मतां ॥ १ ॥
अनामया ह्यशोकाश्च नरा यत्र तथा स्त्रियः ।
प्लक्षः षण्डश्च तत्रोक्तः सुमहान्नन्दनोपमः ॥ २ ॥
तस्य ते वै फलरसं पिबन्तः पुरुषाः सदा ।
स्थिरयौवननिष्पन्ना स्त्रियश्चोत्पलगंधिकाः ॥ ३ ॥
अतः परं किंपुरुषाद्धरिवर्षं प्रचक्ष्यते ।
महारजतसङ्काशा जायन्ते तत्र मानवाः ॥ ४ ॥
देवलोकच्युताः सर्व्वे देवरूपाश्च सर्व्वशः ।
हरिवर्षे नराः सर्व्वे पिबन्तीक्षुरसं शुभं ॥ ५ ॥
न जरा बाधते तत्र न जीर्य्यन्ते च कर्हिचित् ।
तावत्तमेव ते कालं जीवन्त्यथ निरामयाः ॥ ६ ॥
मेरुवर्षं मया प्रोक्तं मध्यमं यदिलावृतं ।
न तत्र सूर्य्यस्तपति न ते जीर्य्यन्ति मानवाः ॥ ७ ॥
लभन्ते नात्मलाभञ्च रश्मयश्चन्द्रसूर्य्ययोः ।
नक्षत्राणां ग्रहाणाञ्च मेरोस्तत्र परा द्युतिः ॥ ८ ॥
पद्मप्रभाः पद्मगन्धा जम्बूफलरसाशिनः ।
पद्मपत्रायताक्षास्तु जायन्ते तत्र मानवाः ॥ ९ ॥

वर्षाणान्तु सहस्राणि तत्राप्यायुस्त्रयोदश ।
शरावाकारसंस्थानो मेरुमध्ये इलावृते ॥ १० ॥
मेरुस्तत्र महाशैलस्तदाख्यातमिलावृतं ।
रम्यकं वर्षमस्माच्च कथयिष्ये निबोध तं ॥ ११ ॥
वृक्षस्तत्रापि चोत्तुङ्गो न्यग्रोधो हरितच्छदः ।
तस्यापि ते फलरसं पिबन्तो वर्त्तयन्ति वै ॥ १२ ॥
वर्षायुतायुषस्तत्र नरास्तत्फलभोगिनः ।
रतिप्रधाननिर्मला जरादौर्गन्ध्यवर्ज्जिताः ॥ १३ ॥
तस्मादप्युत्तरं वर्षं नाम्ना ख्यातं हिरण्मयं ।
हिरण्वती नदी यत्र प्रभूतकमलोज्ज्वला ॥ १४ ॥
महाबलाः सुतेजस्का जायन्ते तत्र मानवाः ।
महाकाया महासत्त्वा धनिनः प्रियदर्शनाः ॥ १५ ॥

इति श्रीमार्कण्डेयपुराणे भुवनकोषः समाप्तः ॥ ६० ॥

एकषष्टितमोऽध्यायः ॥

क्रौष्टुकिरुवाच ॥

कथितं भवता सम्यक् यत् पृष्टोऽसि महामुने ।
भूसमुद्रादिसंस्थानं प्रमाणानि तथा ग्रहाः ॥ १ ॥
तेषाञ्चैव प्रमाणञ्च नक्षत्राणाञ्च संस्थितिः ।
भूरादयस्तथा लोकाः पातालान्यखिलान्यपि ॥ २ ॥

स्वायम्भुवं तथा ख्यातं गुने मन्वन्तरं मम ।
तदनन्तरमप्यहं श्रोतुमिच्छे मन्वन्तराणि वै ॥
मन्वन्तराधिपान् देवानृषींस्तत्तनयान्नृपान् ॥ ३ ॥

मार्कण्डेय उवाच ॥

मन्वन्तरं मयाख्यातं तव स्वायम्भुवं च यत् ।
स्वारोचिषाख्यमन्यत्तु शृणु तस्मादनन्तरं ॥ ४ ॥
कश्चिद्द्विजातिप्रवरः पुरेऽभूदरुणास्पदे ।
वरुणायास्तटे विप्रो रूपेणात्यश्विनावपि ॥ ५ ॥
मृदुस्वभावः सद्वृत्तो वेदवेदाङ्गपारगः ।
सदातिथिप्रियो रात्रावागतानां समाश्रयः ॥ ६ ॥
तस्य बुद्धिरियं त्वासीदहं पश्ये वसुन्धरां ।
अतिरम्यवनोद्यानां नानानगरशोभितां ॥ ७ ॥
अथागतोऽथितिः कश्चित् कदाचित्तस्य वेश्मनि ।
नानौषधिप्रभावज्ञो मन्त्रविद्याविशारदः ॥ ८ ॥
अभ्यर्थितस्तु तेनासौ श्रद्धापूतेन चेतसा ।
तस्याचख्यौ स देशांश्च रम्याणि नगराणि च ॥ ९ ॥
वनानि नद्यः शैलांश्च पुण्यान्यायतनानि च ।
स ततो विस्मयाविष्टः प्राह तं द्विजसत्तमं ॥ १० ॥
अनेकदेशदर्शित्वेनातिश्रमसमन्वितः ।
त्वं नातिवृद्धो वयसा नातिवृत्तश्च यौवनात् ।
कथमल्पेन कालेन पृथिवीमटसि द्विज ॥ ११ ॥

ब्राह्मण उवाच ॥

मन्त्रौषधिप्रभावेन विप्राप्रतिहता गतिः ।
योजनानां सहस्रं हि दिनार्द्धेन व्रजाम्यहं ॥ १२ ॥

मार्कण्डेय उवाच ॥

ततः स विप्रस्तं भूयः प्रत्युवाचेदमादरात् ।
श्रद्दधानो वचस्तस्य ब्राह्मणस्य विपश्चितः ॥ १३ ॥
मम प्रसादं भगवन् कुरु मंत्रप्रभावजं ।
द्रष्टुमेतां मम महीमतीवेच्छा प्रवर्त्तते ॥ १४ ॥
प्रादात्स ब्राह्मणस्तस्मै पादलेपमुदारधीः ।
अभिमन्त्रयामास दिशं तेनाख्याताञ्च यत्नतः ॥ १५ ॥
तेनानुलिप्तपादोऽथ स द्विजो द्विजसत्तम ।
हिमवन्तमगाद्द्रष्टुं नानाप्रस्रवणान्वितं ॥ १६ ॥
सहस्रं योजनानां हि दिनार्द्धेन व्रजामि यत् ।
आयास्यामीति सञ्चिन्त्य तदर्द्धेनापरेण हि ॥ १७ ॥
संप्राप्तो हिमवत्पृष्ठं नातिश्रान्ततनुर्द्विज ।
विचचार ततस्तत्र तुहिनाचलभूतले ॥ १८ ॥
पादाक्रान्तेन तस्याथ तुहिनेन विलीयता ।
प्रक्षालितः पादलेपः परमौषधिसम्भवः ॥ १९ ॥
ततो जडगतिः सोऽथ इतश्चेतश्च पर्य्यटन् ।
ददर्शातिमनोज्ञानि सानूनि हिमभूभृतः ॥ २० ॥
सिद्धगन्धर्व्वजुष्टानि किन्नराभिरतानि च ।
क्रीडाविहाररम्याणि देवादीनामितस्ततः ॥ २१ ॥

दिव्यापरोगणशतैराकीर्णान्यवलोकयन् ।
नातृप्यत द्विजश्रेष्ठः प्रोद्भूतपुलको मुने ॥ २२ ॥
क्वचित् प्रस्रवणाद्भूष्टजलपातमनोरमं ।
प्रनृत्यच्छिखिकेकाभिरन्यतश्च निनादितं ॥ २३ ॥
दात्यूहकोयष्टिकाद्यैः क्वचिच्चातिमनोहरैः ।
पुंस्कोकिलकलालापैः श्रुतिहारिभिरन्वितं ॥ २४ ॥
प्रफुल्लतरुगन्धेन वासितानिलवीजितं ।
मुदा युक्तः स ददृशे हिमवन्तं महागिरिं ॥ २५ ॥
दृष्ट्वा चैतं द्विजसुतो हिमवन्तं महाचलं ।
श्वो द्रक्ष्यामीति संचिन्त्य मतिञ्चक्रे गृहं प्रति ॥ २६ ॥
विभ्रष्टपादलेपोऽथ चिरेण जडितक्रमः ।
चिन्तयामास किमिदं मयाज्ञानादनुष्ठितं ॥ २७ ॥
यदि प्रलेपो नष्टो मे विलीनो हिमवारिणा ।
शैलोऽतिदुर्गमश्चायं दूरञ्चाहमिहागतः ॥ २८ ॥
प्रयास्यामि क्रियाहानिमग्निशुश्रूषणादिकं ।
कथमत्र करिष्यामि सङ्कटं महदागतं ॥ २९ ॥
इदं रम्यमिदं रम्यमित्यस्मिन् वरपर्व्वते ।
सक्तदृष्टिरहं तृप्तिं न यास्येऽब्दशतैरपि ॥ ३० ॥
किन्नराणां कलालापाः समन्ताच्छ्रोत्रहारिणः ।
प्रफुल्लतरुगन्धांश्च घ्राणमत्यन्तमृच्छति ॥ ३१ ॥
सुखस्पर्शस्तथा वायुः फलानि रसवन्ति च ।
हरन्ति प्रसभं चेतो मनोज्ञानि सरांसि च ॥ ३२ ॥

एवं गते तु पश्येयं यदि कञ्चित् तपोनिधिं।
स ममोपदिशेन्मार्गं गमनाय गृहं प्रति ॥ ३३ ॥

मार्कण्डेय उवाच ॥

स एवं चिन्तयन् विप्रो बभ्राम च हिमाचले।
अष्टपादौषधिबलो वैक्लवं परमं गतः ॥ ३४ ॥
तं ददर्श भ्रमन्तञ्च मुनिश्रेष्ठं वरूथिनी।
वराप्सरा महाभागा मौलेया रूपशालिनी ॥ ३५ ॥
तस्मिन्दृष्टे ततः साभूद्द्विजवर्य्ये वरूथिनी।
मदनाकृष्टहृदया सानुरागा हि तत्क्षणात् ॥ ३६ ॥
चिन्तयामास को न्वेष रमणीयतमाकृतिः।
सफलं मे भवेज्जन्म यदि मां नावमन्यते ॥ ३७ ॥
अहोऽस्य रूपमाधुर्य्यमहोऽस्य ललिता गतिः।
अहो गम्भीरता दृष्टेः कुतोऽस्य सदृशो भुवि ॥ ३८ ॥
दृष्टा देवास्तथा दैत्याः सिद्धगन्धर्व्वपन्नगाः।
कथमेकोऽपि नास्त्यस्य तुल्यरूपो महात्मनः ॥ ३९ ॥
यथाहमस्मिन्मय्येष सानुरागस्तथा यदि।
भवेद्व मया कार्य्यस्तत्स्यातः पुण्यसञ्चयः ॥ ४० ॥
यद्येष मयि सुस्निग्धां दृष्टिमद्य निपातयेत्।
कृतपुण्या न मत्तोऽन्या त्रैलोक्ये वनिता ततः ॥ ४१ ॥

मार्कण्डेय उवाच ॥

एवं सञ्चिन्तयन्ती सा दिव्ययोषित् स्मरातुरा।
आत्मानं दर्शयामास कमनीयतराकृतिं ॥ ४२ ॥

तान्तु दृष्ट्वा द्विजसुतश्चारुरूपां वरूथिनीं ।
सोपचारं समागम्य वाक्यमेतदुवाच ह ॥ ४३ ॥
का त्वं कमलगर्भाभे कस्य किंवानुतिष्ठसि ।
ब्राह्मणोऽहमिहायातो नगरादरुणास्पदात् ॥ ४४ ॥
पादलेपोऽत्र मे ध्वस्तो विलीनो हिमवारिणा ।
यस्यानुभावादत्राहमागतो मदिरेक्षणे ॥ ४५ ॥

वरूथिन्युवाच ॥

मौलेयाहं महाभागा नाम्ना ख्याता वरूथिनी ।
विचरामि सदैवात्र रमणीये महाचले ॥ ४६ ॥
साहं त्वद्दर्शनाद्विप्र कामवक्तव्यताङ्गता ।
प्रशाधि यन्मया कार्य्यं त्वदधीनास्मि साम्प्रतं ॥ ४७ ॥

ब्राह्मण उवाच ॥

येनोपायेन गच्छेयं निजगेहं शुचिस्मिते ।
तन्ममाचक्ष्व कल्याणि हानिर्नोऽखिलकर्म्मणां ॥ ४८ ॥
नित्यनैमित्तिकानान्तु महाहानिर्द्विजन्मनः ।
भवत्यतस्त्वं हे भद्रे मामुद्धर हिमालयात् ॥ ४९ ॥
प्रशस्यते न प्रवासो ब्राह्मणानां कदाचन ।
अपराद्धं न मे भीरु देशदर्शनकौतुकं ॥ ५० ॥
सतो गृहे द्विजाग्र्यस्य निष्पत्तिः सर्व्वकर्म्मणां ।
नित्यनैमित्तिकानाञ्च हानिरेवं प्रवासिनः ॥ ५१ ॥
सा त्वं किं बहुनोक्तेन तथा कुरु यशस्विनि ।
यथा नास्तं गते सूर्य्ये पश्यामि निजमालयं ॥ ५२ ॥

वरूथिन्युवाच ॥

मैवं ब्रूहि महाभाग माभूत्स दिवसो मम ।
मां परित्यज्य यत्र त्वं निजगेहमुपैष्यसि ॥ ५३ ॥
अहो रम्यतरः स्वर्गो न यतो द्विजनन्दन ।
अतो वयं परित्यज्य तिष्ठामोऽत्र सुरालयं ॥ ५४ ॥
स त्वं सह मया कान्त कान्तोऽत्र तुहिनाचले ।
रममाणो न मर्त्यानां बान्धवानां स्मरिष्यसि ॥ ५५ ॥
स्रजो वस्त्राण्यलङ्कारान् भोज्यभोज्यानुलेपनं ।
दास्याम्यत्र तथाहन्ते स्मरेण वशगा हता ॥ ५६ ॥
वीणावेणुस्वनं गीतं किन्नराणां मनोरमं ।
अङ्गाह्लादकरो वायुरूष्णान्नमुदकं शुचि ॥ ५७ ॥
मनोभिलपिता शय्या सुगन्धमनुलेपनं ।
इहासतो महाभाग गृहे किन्ते निजेऽधिकं ॥ ५८ ॥
इहासतो नैव जरा कदाचित्ते भविष्यति ।
त्रिदशानामियं भूमिर्यौवनोपचयप्रदा ॥ ५९ ॥
इत्युक्त्वा सानुरागा सा सहसा कमलेक्षणा ।
आलिलिङ्ग प्रसीदेति वदन्ती कलमुन्मना: ॥ ६० ॥

ब्राह्मण उवाच ॥

मा मां स्प्राक्षीर्व्रजान्यत्र दुष्टे यः सदृशस्तव ।
मयान्यथा याचिता त्वमन्यथैवाप्युपैषि मां ॥ ६१ ॥
सायं प्रातर्हुतं हव्यं लोकान् यच्छति शाश्वतान् ।
त्रैलोक्यमेतदखिलं मूढे हव्ये प्रतिष्ठितं ॥ ६२ ॥

वरूथिन्युवाच ॥

किन्नो नाहं प्रिया विप्र रमणीयो न किं गिरिः ।
गन्धर्व्वान् किन्नरादींश्च त्यक्त्वाभीष्टो हि कस्तव ॥ ६३ ॥
निजमालयमप्यस्माद्भवान् यास्यत्यसंशयं ।
स्वल्पकालं मया सार्द्धं भुङ्क्ष्व भोगान् सुदुर्लभान् ॥ ६४ ॥

ब्राह्मण उवाच ॥

अभीष्टा गार्हपत्याद्याः सततं मे त्रयोऽग्नयः ।
रम्यं ममाग्निशरणं देवी विस्तरणी प्रिया ॥ ६५ ॥

वरूथिन्युवाच ॥

अष्टावात्मगुणा ये हि तेषामादौ दया द्विज ।
तां करोषि कथं न त्वं मयि सद्धर्म्मपालक ॥ ६६ ॥
त्वद्विमुक्ता न जीवामि तथा प्रीतिमती त्वयि ।
नैतद्वदाम्यहं मिथ्या प्रसीद कुलनन्दन ॥ ६७ ॥

ब्राह्मण उवाच ॥

यदि प्रीतिमती सत्यं नोपचाराद्ब्रवीषि मां ।
तदुपायं समाचक्ष्व येन यामि स्वमालयं ॥ ६८ ॥

वरूथिन्युवाच ॥

निजमालयमप्यस्माद्भवान् यास्यत्यसंशयं ।
स्वल्पकालं मया सार्द्धं भुङ्क्ष्व भोगान् सुदुर्लभान् ॥ ६९ ॥

ब्राह्मण उवाच ॥

न भोगार्थाय विप्राणां प्रस्यते हि वरूथिनी ।
इह क्लेशाय विप्राणां चेष्टा प्रेत्याफलप्रदा ॥ ७० ॥

वरूथिन्युवाच ॥

सन्त्यजन्तीं म्रियमाणायां मम हत्वा परत्र ते ।
पुण्यस्यैव फलं भावि भोगाश्चान्यत्र जन्मनि ॥ ७१ ॥
एवं च द्वयमप्यत्र तवोपचयकारणं ।
प्रत्याख्यानादहं मृत्युं त्वञ्च पापमवाप्स्यसि ॥ ७२ ॥

ब्राह्मण उवाच ॥

परस्त्रियं नाभिलषेदित्यूचुर्गुरवो मम ।
तेन त्वां नाभिवाञ्छामि कामं विलप शुष्य वा ॥ ७३ ॥

मार्कण्डेय उवाच ॥

इत्युक्त्वा स महाभागः स्पृष्ट्वापः प्रयतः शुचिः ।
प्राहेदं प्रणिपत्याग्निं गार्हपत्यमुपांशुना ॥ ७४ ॥
भगवन् गार्हपत्याग्ने योनिस्त्वं सर्व्वकर्म्मणां ।
त्वत्त आहवनीयोऽग्निर्दक्षिणाग्निश्च नान्यतः ॥ ७५ ॥
युष्मदाप्यायनाद्देवा वृष्टिसस्यादिहेतवः ।
भवन्ति सस्यादखिलं जगद्भवति नान्यतः ॥ ७६ ॥
एवं त्वत्तो भवत्येतद्येन सत्येन वै जगत् ।
तथाहमद्य स्वं गेहं पश्येयं सति भास्करे ॥ ७७ ॥
यथा वै वैदिकं कर्म्म स्वकाले नोज्झितं मया ।
तेन सत्येन पश्येयं गृहस्थोऽद्य दिवाकरं ॥ ७८ ॥
यथा च न परद्रव्ये परदारे च मे मतिः ।
कदाचित् साभिलाषाभूत्तथैतत् सिद्धिमेतु मे ॥ ७९ ॥

इति श्रीमार्कण्डेयपुराणे स्वारोचिषे मन्वन्तरे ब्राह्मणवाक्यं ॥ ६१ ॥

द्विषष्टितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

एवन्तु वदतस्तस्य द्विजपुत्रस्य पावकः ।
गार्हपत्यः शरीरे तु सन्निधानमथाकरोत् ॥ १ ॥
तेन चाधिष्ठितः सोऽथ प्रभामण्डलमध्यगः ।
व्यदीपयत तं देशं मूर्त्तिमानिव हव्यवाट् ॥ २ ॥
तस्यास्तु सुतरां तत्र तादृग्रूपे द्विजन्मनि ।
अनुरागोऽभवद्विप्र पश्यन्त्या देवयोषितः ॥ ३ ॥
ततः सोऽधिष्ठितस्तेन हव्यवाहेन तत्क्षणात् ।
यथा पूर्व्वं तथा गन्तुं प्रवृत्तो द्विजनन्दनः ॥ ४ ॥
जगाम च त्वरायुक्तस्तया देव्या निरीक्षितः ।
आदृष्टिपातात्तन्वङ्ग्या निश्वासोत्कम्पिकन्धरं ॥ ५ ॥
ततः क्षणेनैव तदा निजगेहमवाप्य सः ।
यथा प्रोक्तं द्विजश्रेष्ठश्चकार सकलाः क्रियाः ॥ ६ ॥
अथ सा चारुसर्व्वाङ्गी तत्रासक्तात्ममानसा ।
निश्वासपरमा निन्ये दिनशेषं तथा निशां ॥ ७ ॥
निश्वसन्त्यनवद्याङ्गी हाहेति रुदती मुहुः ।
मन्दभाग्येति चात्मानं निनिन्द मदिरेक्षणा ॥ ८ ॥
न विहारे न चाहारे रमणीये न वा वने ।
न कन्दरेषु रम्येषु सा बबन्ध तदा रतिं ॥ ९ ॥

चकार रममाणे च चक्रवाकयुगे स्पृहां ।
मुक्ता तेन वरारोहा निनिन्द निजयौवनं ॥ १० ॥
क्वागताहमिमं शैलं दुष्टदैवबलात्कृता ।
क्व च प्राप्तः स मे दृष्टिर्गोचरं तादृशो नरः ॥ ११ ॥
यद्यद्य स महाभागो न मे सङ्गमुपैष्यति ।
तत्कामाग्निरवश्यं मां क्षययिष्यति दुःसहः ॥ १२ ॥
रमणीयमभूद्यत्तत्पुंस्कोकिलनिनादितं ।
तेन हीनन्तदेवैतद्दहतीवाद्य मामलं ॥ १३ ॥

मार्कण्डेय उवाच ॥

इत्थं सा मदनाविष्टा जगाम मुनिसत्तमं ।
ववृधे च तदा रागस्तस्यास्तस्मिन् प्रतिक्षणं ॥ १४ ॥
कलिर्नाम्ना तु गन्धर्व्वः सानुरागो निराकृतः ।
तया पूर्व्वमभूत्सोऽथ तदवस्थां ददर्श तां ॥ १५ ॥
स चिन्तयामास तदा किं न्वेषा गजगामिनी ।
निश्वासपवनम्लाना गिरावद्य वरूथिनी ॥ १६ ॥
मुनिशापक्षता किंनु केनचित् किं विमानिता ।
वाष्पवारिपरिक्लिन्नमियन्धत्ते यतो मुखं ॥ १७ ॥
ततः स दध्यौ सुचिरं तमर्थं कौतुकात् कलिः ।
ज्ञातवांश्च प्रभावेन समाधेः स यथातथं ॥ १८ ॥
पुनः स चिन्तयामास तद्विज्ञाय मुनेः कलिः ।
ममोपपादितं साधु भाग्यैरेतत्पुराकृतैः ॥ १९ ॥
मयैषा सानुरागेन बहुशः प्रार्थिता सती ।

निराकृतवती सेयमद्य प्राप्या भविष्यति ॥ २० ॥
मानुषे सानुरागेयं तच्च तद्रूपधारिणि ।
रंस्यते मय्यसन्दिग्धं किं कालेन करोमि तत् ॥ २१ ॥

मार्कण्डेय उवाच ॥

आत्मप्रभावेन ततस्तस्य रूपं द्विजन्मनः ।
कृत्वा चचार यत्रास्ते निपगा सा वरूथिनी ॥ २२ ॥
सा तं दृष्ट्वा वरारोहा किञ्चिदुत्फुल्ललोचना ।
समेत्य प्राह तन्वङ्गी प्रसीदेति पुनः पुनः ॥ २३ ॥
त्वया त्यक्ता न सन्देहः परित्यक्ष्यामि जीवितं ।
तत्राधर्म्मः कष्टतरः क्रियालोपो भविष्यति ॥ २४ ॥
मया समेत्य रम्येऽस्मिन् महाकन्दरकन्दरे ।
मत्परित्राणजं धर्म्ममवश्यं प्रतिपत्स्यसे ॥ २५ ॥
आयुषः सावशेषं मे नूनमस्ति महामते ।
निवृत्तस्तेन नूनं त्वं हृदयाह्लादकारकः ॥ २६ ॥

कलिरुवाच ॥

किं करोमि क्रियाहानिर्भवत्यत्र सतो मम ।
त्वमप्येवंविधं वाक्यं ब्रवीषि तनुमध्यमे ॥ २७ ॥
तदहं सङ्कटं प्राप्तो यद्ब्रवीमि करोषि तत् ।
यदि स्यात् सङ्गमो मेऽद्य भवत्या सह नान्यथा ॥ २८ ॥

वरूथिनी उवाच ॥

प्रसीद यद्ब्रवीषि त्वं तत्करोमि न ते मृषा ।
ब्रवीम्येतदनाशङ्कं यत्ते कार्य्यं मयाधुना ॥ २९ ॥

कलिरुवाच ॥

नाथ संभोगसमये द्रष्टव्योऽहं त्वया वने ।
निमीलिताक्ष्याः संसर्गस्तव सुभ्रु मया सह ॥ ३० ॥

वरूथिन्युवाच ॥

एवं भवतु भद्रन्ते यथेच्छसि तथास्तु तत् ।
मया सर्व्वप्रकारं हि वशे स्थेयन्त्वयाधुना ॥ ३१ ॥

इति श्रीमार्कण्डेयपुराणे स्वारोचिषे मन्वन्तरे ॥ ६२ ॥

त्रिषष्टितमोऽध्यायः ।

मार्कण्डेय उवाच ॥

ततः सह तया सोऽथ रराम गिरिसानुषु ।
फुल्लकाननहृद्येषु मनोज्ञेषु सरःसु च ॥ १ ॥
कन्दरेषु च रम्येषु निम्नगापुलिनेषु च ।
मनोज्ञेषु तथान्येषु देशेषु मुदितो द्विज ॥ २ ॥
वह्निनाधिष्ठितस्यासीद्यद्रूपन्तस्य तेजसा ।
अचिन्तयद्भोगकाले निमीलितविलोचना ॥ ३ ॥
ततः कालेन सा गर्भमवाप मुनिसत्तम ।
गन्धर्व्ववीर्य्यतो रूपं चिन्तनाच्च द्विजन्मनः ॥ ४ ॥
तां गर्भधारिणीं सोऽथ सान्त्वयित्वा वरूथिनीं ।
विप्ररूपधरो यातस्तया प्रीत्या विसर्ज्जितः ॥ ५ ॥

जज्ञे स बालो द्युतिमान् ज्वलन्निव विभावसुः ।
स्वरोचिभिर्यथा सूर्य्यो भासयन् सकला दिशः ॥ ६ ॥
स्वरोचिभिर्यतो भाति भास्वानिव स बालकः ।
ततः स्वरोचिरित्येवं नाम्ना ख्यातो बभूव सः ॥ ७ ॥
ववृधे च महाभागो वयसानुदिनन्तथा ।
गुणौघैश्च यथा बालः कलाभिः शशलाञ्छनः ॥ ८ ॥
स जग्राह धनुर्व्वेदं वेदांश्चैव यथाक्रमं ।
विद्याश्चैव महाभागस्तदा यौवनगोचरः ॥ ९ ॥
मन्दराद्रौ कदाचित् स विचरंश्चारुचेष्टितः ।
ददर्शैकां तदा कन्यां गिरिप्रस्थे भयातुरां ॥ १० ॥
त्रायस्वेति निरीक्ष्यैनं सा तदा वाक्यमब्रवीत् ।
माभैषीरिति स प्राह भयविप्लुतलोचनां ॥ ११ ॥
किमेतदिति तेनोक्ते वीरवाक्ये महात्मना ।
ततः सा कथयामास श्वासाक्षेपप्लुताक्षरं ॥ १२ ॥

कन्योवाच ॥

अहमिन्दीवराख्यस्य सुता विद्याधरस्य वै ।
नाम्ना मनोरमा जाता सुतायां मरुधन्वनः ॥ १३ ॥
मन्दारविद्याधरजा सखी मम विभावरी ।
कलावती चाप्यपरा सुता पारस्य वै मुनेः ॥ १४ ॥
ताभ्यां सह मया यातं कैलासतटमुत्तमं ।
तत्र दृष्टो मुनिः कश्चित्तपसातिकृशाकृतिः ॥ १५ ॥
क्षुत्क्षामकण्ठो निस्तेजा दूरपाताक्षितारकः ।

मयावहसितः क्रुद्धः स तदा मां शशाप ह ॥ १६ ॥
क्षामक्षामस्वरः किञ्चित्कम्पिताधरपल्लवः ।
त्वयावहसितो यस्मादनार्ये दुष्टतापसि ॥ १७ ॥
तस्मात् त्वामचिरेणैव राक्षसोऽभिभविष्यति ।
दत्ते शापे मत्सखीभ्यां स तु निर्भर्त्सितो मुनिः ॥ १८ ॥
धिक् ते ब्राह्मण्यमक्षान्त्या कृतन्ते निखिलन्तपः ।
अमर्षेणैर्धर्षितोऽसि तपसा नातिकर्षितः ॥ १९ ॥
क्षान्त्यास्पदं वै ब्राह्मण्यं क्रोधसंयमनन्तपः ।
एतच्छ्रुत्वा ददौ शापं तयोरप्यमितद्युतिः ॥ २० ॥
एकस्याः कुष्ठमङ्गेषु भाव्यन्यस्यास्तथा क्षयः ।
तयोस्तथैव तज्जातं यथोक्तं तेन तत्क्षणात् ॥ २१ ॥
ममाप्येवं महद्रक्षः समुपैति पदानुगं ।
न शृणोषि महानादं तस्यादूरेऽपि गर्ज्जतः ॥ २२ ॥
तृतीयमद्य दिवसं यन्मे पृष्ठन्न मुञ्चति ।
अस्त्रग्रामस्य सर्व्वस्य हृदयग्राहमद्य ते ॥ २३ ॥
तं प्रयच्छामि मां रक्ष रक्षसोऽस्मान्महामते ।
प्रादात् स्वायम्भुवस्यादौ स्वयं रुद्रः पिनाकधृक् ॥ २४ ॥
स्वायम्भुवो वशिष्ठाय सिद्धवर्य्याय दत्तवान् ।
तेनापि दत्तं मन्मातुः पित्रे चित्रायुधाय वै ॥ २५ ॥
प्रादादौद्वाहिकं सोऽपि मत्पित्रे श्वशुरः स्वयं ।
मयापि शिक्षितं वीर सकाशाद्बालया पितुः ॥ २६ ॥
हृदयं सकलास्त्राणामशेषरिपुनाशनं ।

तदिदं गृह्यतां शीघ्रमशेषास्त्रपरायणं ॥ २७ ॥
ततो जहि दुरात्मानमेनं ब्रह्मसमागतं ॥ २८ ॥

मार्कण्डेय उवाच ॥

तथेत्युक्तो ततस्तेन वार्य्युपस्पृश्य तस्य तत् ।
अस्त्राणां हृदयं प्रादात् सरहस्यनिवर्त्तनं ॥ २९ ॥
एतस्मिन्नन्तरे रक्षस्तत्तदा भीषणाकृतिः ।
नर्द्दमानो महानादमाजगाम त्वरान्वितः ॥ ३० ॥
मयाभिभूता किं त्राणमुपैषि द्रुतमेहि मे ।
भक्षाय किञ्चिरेणेति ब्रुवाणं तं ददर्श सः ॥ ३१ ॥
स्वरोचिश्चिन्तयामास दृष्ट्वा तं समुपागतं ।
गृह्णात्वेष वचः सत्यं तस्यास्त्विति महामुने ॥ ३२ ॥
जग्राह समुपेत्यैनां त्वरया सोऽपि राक्षसः ।
त्राहि त्राहीति करुणं विलपन्तीं सुमध्यमां ॥ ३३ ॥
ततः स्वरोचिः संक्रुद्धश्चण्डास्त्रमतिभैरवं ।
दृष्ट्वा निवेश्य तद्रक्षो दृदशानिमिषेक्षणः ॥ ३४ ॥
तदाभिभूतः स तदा तामुत्सृज्य निशाचरः ।
प्रसीद शाम्यतामस्त्रं श्रूयताञ्चेत्यभाषत ॥ ३५ ॥
मोक्षितोऽहं त्वया शापादतिघोरान्महाद्युते ।
प्रदत्तादतितीव्रेण ब्रह्ममित्रेण धीमता ॥ ३६ ॥
उपकारी न मे त्वत्तो महाभागाधिकोऽपरः ।
येनाहं सुमहाकष्टान्महाशापाद्विमोचितः ॥ ३७ ॥

मरीचिरुवाच ॥

ब्रह्ममित्रेण मुनिना किन्निमित्तं महात्मना ।
शप्तस्त्वं कीदृशश्चैव शापो दत्तोऽभवत्पुरा ॥ ३८ ॥

राक्षस उवाच ॥

ब्रह्ममित्रोऽष्टधा छिन्नमायुर्व्वेदमधीतवान् ।
त्रयोदशाधिकारञ्च सप्रह्याथर्व्वणो द्विजः ॥ ३९ ॥
अहञ्चेन्दीवराख्येति ख्यातोऽस्या जनकोऽभवं ।
विद्याधरपतेः पुत्रो नलनाभस्य खड्गिनः ॥ ४० ॥
मया च याचितः पूर्व्वं ब्रह्ममित्रोऽभवन्मुनिः ।
आयुर्व्वेदमशेषं मे भगवान् दातुमर्हसि ॥ ४१ ॥
यदा तु बहुशो वीर प्रश्रयावनतस्य मे ।
न प्रादाद्याचितो विद्यामायुर्व्वेदात्मिकां मम ॥ ४२ ॥
शिष्येभ्यो ददतस्तस्य मयान्तर्धायिगेन हि ।
आयुर्व्वेदात्मिका विद्या गृहीताभूत्तदानघ ॥ ४३ ॥
गृहीतायान्तु विद्यायां मासैरष्टाभिरन्तरात् ।
ममातिहर्षादभवद्धासोऽतीव पुनः पुनः ॥ ४४ ॥
प्रत्यभिज्ञाय मां हासान्मुनिः कोपसमन्वितः ।
विकम्पितकन्धरः प्राह मामिदं परुषाक्षरं ॥ ४५ ॥
राक्षसेनैव यस्मान्मे त्वयाऽदृश्येन दुर्मते ।
हृता विद्यावहासश्च मामवज्ञाय वै कृतः ॥ ४६ ॥
तस्मात्त्वं राक्षसः पाप मच्छापेन निराकृतः ।
भविष्यसि न सन्देहः सप्तरात्रेण दारुणः ॥ ४७ ॥

इत्युक्तो प्रणिपाताद्यैरुपचारैः प्रसादितः ।
स मामाह पुनर्विप्रस्तत्क्षणान्मृदुमानसः ॥ ४८ ॥
यन्मयोक्तमवश्यन्तद्भावि गन्धर्व्व नान्यथा ।
किन्तु त्वं राक्षसो भूत्वा पुनः स्वं प्राप्स्यसे वपुः ॥ ४९ ॥
नष्टस्मृतिर्यदा क्रुद्धः स्वमपत्यञ्चिखादिषुः ।
निशाचरत्वं गन्तासि तदस्त्रानलतापितः ॥ ५० ॥
पुनः संज्ञामवाप्य स्वामवाप्स्यसि निजं वपुः ।
तथैव स्वमधिष्ठानं लोके गन्धर्व्वसंज्ञिते ॥ ५१ ॥
सोऽहं त्वया महाभाग मोक्षितोऽस्मान्महाभयात् ।
निशाचरत्वाद्यद्वीर तेन मे प्रार्थनां कुरु ॥ ५२ ॥
इमान्ते तनयां भार्य्यां प्रयच्छामि प्रतीच्छ तां ।
आयुर्व्वेदश्च सकलस्त्वष्टाङ्गो यो मया ततः ॥
मुनेः सकाशात् संप्राप्तस्तं गृहाण महामते ॥ ५३ ॥

मार्कण्डेय उवाच ॥

इत्युक्त्वा प्रददौ विद्यां स च दिव्याम्बरोज्ज्वलः ।
स्रग्भूषणधरो दिव्यं पुराणं वपुरास्थितः ॥ ५४ ॥
दत्वा विद्यां ततः कन्यां स दातुमुपचक्रमे ।
तमाह सा तदा कन्या जनितारं स्वरूपिणं ॥ ५५ ॥
अनुरागो ममाऽप्यत्र तातातीव महात्मनि ।
दर्शनादेव संजातो विशेषेणोपकारिणि ॥ ५६ ॥
किन्त्वेषा मे सखी सा च मत्कृते दुःखपीडिते ।
अतो नाभिलषे भोगान् भोक्तुमेतेन वै समं ॥ ५७ ॥

पुरुषैरपि नो शक्या कर्त्तुमित्थं न्वृशंसता ।
स्वभावरुचिरैर्मादृक् कथं योषित् करिष्यति ॥ ५८ ॥
साहं यथा ते दुःखार्त्ता मत्कृते कन्यके पितः ।
तथा स्थास्यामि तद्दुःखे तच्छोकानलतापिता ॥ ५९ ॥

स्वरोचिरुवाच ॥

आयुर्व्वेदप्रसादेन ते करिष्ये पुनर्नवे ।
सख्यौ तव महाशोकं समुत्सृज्य सुमध्यमे ॥ ६० ॥

मार्कण्डेय उवाच ॥

ततः पित्रा स्वयं दत्तां तां कन्यां स विधानतः ।
उपयेमे गिरौ तस्मिन् स्वरोचिश्चारुलोचनां ॥ ६१ ॥
दत्त्वा तु तां तदा कन्यामभिशान्त्य च भाविनीं ।
जगाम दिव्यया गत्या गन्धर्व्वः स्वपुरन्ततः ॥ ६२ ॥
स चापि सहितस्तन्व्या तदुद्यानन्तदा ययौ ।
कन्यकायुगलं यत्र तच्छापात्त्वगदातुरं ॥ ६३ ॥
ततस्तयोः स तत्त्वज्ञो रोगघ्नैरौषधैरसैः ।
चकार नीरुजे देहे स्वरोचिरपराजितः ॥ ६४ ॥
ततोऽतिशोभने कन्ये विमुक्ते व्याधितः शुभे ।
स्वकान्त्योज्ज्योतितदिग्भागं चक्राते तन्महीधरं ॥ ६५ ॥

इति श्रीमार्कण्डेयपुराणे स्वारोचिषे मन्वन्तरे ॥ ६३ ॥

चतुःषष्टितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

एवं विमुक्तरोगा तु कन्यका तं मुदान्विता।
स्वरोचिषमुवाचेदं शृणुष्व वचनं प्रभो ॥ १ ॥
मन्दारविद्याधरजा नाम्ना ख्याता विभावरी।
उपकारिन् स्वमात्मानं प्रयच्छामि प्रतीच्छ मां ॥ २ ॥
विद्याञ्च तुभ्यं दास्यामि सर्व्वभूतरुतानि ते।
यथाभिव्यक्तिमेष्यन्ति प्रसादपरमो भव ॥ ३ ॥

मार्कण्डेय उवाच ॥

एवमस्त्विति तेनोक्ते धर्म्मज्ञेन स्वरोचिषा।
द्वितीया तु तदा कन्या इदं वचनमब्रवीत् ॥ ४ ॥
कुमारब्रह्मचार्य्यासीत् पारो नाम पिता मम।
ब्रह्मर्षिः सुमहाभागो वेदवेदाङ्गपारगः ॥ ५ ॥
तस्य पुंस्कोकिलालापरमणीये मधौ पुरा।
आजगामाप्सराभ्यासं प्रख्याता पुञ्जिकास्तना ॥ ६ ॥
कामवक्तव्यतां नीतः स तदा मुनिपुङ्गवः।
तत्संयोगेऽहमुत्पन्ना तस्यामत्र महाचले ॥ ७ ॥
विहाय मां गता सा च मातास्मिन्निर्जने वने।
बालामेकां महीपृष्ठे व्यालश्वापदसंकुले ॥ ८ ॥
ततः कलाभिः सोमस्य वर्द्धन्तीभिरवक्षयं।
आप्यायमानाहरहो वृद्धिं यातास्मि सत्तम ॥ ९ ॥

ततः कलावतीत्येतन्मम नाम महात्मना ।
गृहीतायाः कृतं पित्रा गन्धर्व्वेण सुभानना ॥ १० ॥
न दत्ताहं तदा तेन याचितेन महात्मना ।
देवारिणा लिना सप्तस्ततो मे घातितः पिता ॥ ११ ॥
ततोऽहमतिनिर्व्वेदादात्मव्यापादनोद्यता ।
निवारिता शम्भुपत्न्या सत्या सत्यप्रतिश्रवा ॥ १२ ॥
माशुचः सुभ्रु भर्त्ता ते महाभागो भविष्यति ।
स्वरोचिर्नाम पुत्रश्च मनुस्तस्य भविष्यति ॥ १३ ॥
आज्ञाञ्च निधयः सर्व्वे करिष्यन्ति तवादृताः ।
यथाभिलषितं वित्तं प्रदास्यन्ति च ते शुभे ॥ १४ ॥
यस्या वत्से प्रभावेन विद्यायास्तां गृहाण मे ।
पद्मिनी नाम विद्येयं महापद्माभिपूजिता ॥ १५ ॥
इत्याह मां दक्षसुता सती सत्यपरायणा ।
स्वरोचिस्त्वं ध्रुवं देवी नान्यथा सा वदिष्यति ॥ १६ ॥
साहं प्राणप्रदायाद्य तां विद्यां स्वं तथा वपुः ।
प्रयच्छामि प्रतीच्छ त्वं प्रसादसुमुखो मम ॥ १७ ॥

मार्कण्डेय उवाच ॥

एवमस्त्विति तामाह स तु कन्यां कलावतीं ।
विभावर्य्याः कलावत्याः स्निग्धदृष्ट्यानुमोदितः ॥ १८ ॥
जग्राह च ततः पाणौ स तयोरमरद्युतिः ।
नदत्सु देवतूर्य्येषु नृत्यन्तीष्वप्सरःसु च ॥ १९ ॥

इति श्रीमार्कण्डेयपुराणे स्वारोचिषे मन्वन्तरे ॥ ६४ ॥

पञ्चषष्टितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

ततः स ताभिः सहितः पत्नीभिरमरद्युतिः ।
रराम तस्मिन् शैलेन्द्रे रम्यकाननिर्झरे ॥ १ ॥
सर्व्वोपभोगरत्नानि मधूनि मधुराणि च ।
निधयः समुपाजह्रुः पद्मिन्या वशवर्त्तिनः ॥ २ ॥
स्रजो वस्त्राण्यलङ्कारान् गन्धाढ्यमनुलेपनं ।
आसनान्यतिशुभ्राणि काञ्चनानि यथेच्छया ॥ ३ ॥
सौवर्णानि महाभाग करकान् भाजनानि च ।
तथा शय्याश्च विविधा दिव्यैरास्तरणैर्युताः ॥ ४ ॥
एवं स ताभिः सहितो दिव्यगन्धादिवासिते ।
रराम स्वरुचिर्भाभिर्भासिते वरपर्व्वते ॥ ५ ॥
ताश्चापि सह तेनेति लेभिरे मुदमुत्तमां ।
रममाणा यथा स्वर्गे तथा तत्र शिलोच्चये ॥ ६ ॥
कलहंसी जगादैकां चक्रवाकीं जले सतीं ।
तस्य तासाञ्च ललिते सम्बन्धे च स्पृहावती ॥ ७ ॥
धन्योऽयमतिपुण्योऽयं योऽयं यौवनगोचरः ।
दयिताभिः सहैताभिर्भुङ्क्ते भोगानभीप्सितान् ॥ ८ ॥
सन्ति यौवनिनः श्लाघ्यास्तत्पत्नी नातिशोभनाः ।
जगत्यामल्पकाः पत्न्यः पतयश्चातिशोभनाः ॥ ९ ॥

अभीष्टाः कस्यचित् कान्ता कान्तः कस्याश्चिदीप्सितः ।
परस्परानुरागाढ्यं दाम्पत्यमतिदुर्लभं ॥ १० ॥
धन्योऽयं दयिताभीष्टो ह्येताश्चास्यातिवल्लभाः ।
परस्परानुरागो हि धन्यानामेव जायते ॥ ११ ॥
एतन्निशम्य वचनं कलहंसीसमीरितं ।
उवाच चक्रवाकी तां नातिविस्मितमानसा ॥ १२ ॥
नायं धन्यो यतो लज्जा नान्यस्त्रीसन्निकर्षतः ।
अन्यां स्त्रियमयं भुंक्ते न सर्व्वास्वस्य मानसं ॥ १३ ॥
चित्तानुराग एकस्मिन्नधिष्ठाने यतः सखि ।
ततो हि प्रीतिमानेष भार्य्यासु भविता कथं ॥ १४ ॥
एता न दयिताः पत्युर्नैतासां दयितः पतिः ।
विनोदमात्रमेवैता यथा परिजनोऽपरः ॥ १५ ॥
एतासाञ्च यदीष्टोऽयं तत् किं प्राणान्न मुञ्चति ।
आलिङ्गत्यपरां कान्तां ध्यातो वै कान्तयान्यया ॥ १६ ॥
विद्याप्रदानमूल्येन विक्रीतो ह्येष भृत्यवत् ।
प्रवर्त्ततो न हि प्रेम समं बह्वीषु तिष्ठति ॥ १७ ॥
कलहंसि पतिर्धन्यो मम धन्याहमेव च ।
यस्यैकस्याञ्चिरं चित्तं यस्याश्चैकच संस्थितं ॥ १८ ॥

मार्कण्डेय उवाच ॥

सर्व्वसत्त्वरुतज्ञोऽसौ स्वरोचिरपराजितः ।
निशम्य लज्जितो दध्यौ सत्यमेव हि नान्यतं ॥ १९ ॥
ततो वर्षशते याते रममाणो महागिरौ ।

रममाणः समन्ताभिर्ददर्श पुरतो मृगं ॥ २० ॥
सुस्निग्धपीनावयवं मृगीयूथविहारिणं ।
वासिताभिः स्वरूपाभिर्मृगीभिः परिवारितं ॥ २१ ॥
आकृष्टघ्राणपुटका जिघ्रन्तीस्तास्ततो मृगीः ।
उवाच स मृगो रामा लज्जात्यागेन गम्यतां ॥ २२ ॥
नाहं स्वरोचिस्तच्छीलो न चैवाहं सुलोचनाः ।
निर्लज्जा बहवः सन्ति तादृशास्तत्र गच्छत ॥ २३ ॥
एकात्वनेकानुगता यथा हासास्पदं जने ।
अनेकाभिस्तथैवैको भोगदृष्ट्या निरीक्षितः ॥ २४ ॥
तस्य धर्म्मक्रियाहानिरहन्यहनि जायते ।
सक्तोऽन्यभार्य्यया चान्यकामासक्तः सदैव सः ॥ २५ ॥
यस्तादृशोऽन्यस्तच्छीलः परलोकपराङ्मुखः ।
तं कामयत भद्रं वो नाहं तुल्यः स्वरोचिषा ॥ २६ ॥

इति श्रीमार्कण्डेयपुराणे स्वारोचिषे मन्वन्तरे ॥ ६५ ॥

षट्षष्टितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

एवं निरस्यमानास्ता हरिणेन मृगाङ्गनाः ।
श्रुत्वा स्वरोचिरात्मानं मेने स पतितं यथा ॥ १ ॥
त्यागे चकार च मनः स तासां मुनिसत्तम ।
चक्रवाकीमृगप्रोक्तो मृगचर्य्याजुगुप्सितः ॥ २ ॥

समेत्य ताभिर्भूयश्च वर्द्धमानमनोभवः ।
आक्षिप्तनिर्व्वेदकथो रेमे वर्षशतानि षट् ॥ ३ ॥
किन्तु धर्म्माविरोधेन कुर्व्वन् धर्म्माश्रिताः क्रियाः ।
भुंक्ते स्वरोचिर्विषयान् सह ताभिरुदारधीः ॥ ४ ॥
ततश्च जज्ञिरे तस्य त्रयः पुत्त्राः स्वरोचिषः ।
विजयो मेरुनन्दश्च प्रभावश्च महाबलः ॥ ५ ॥
मनोरमा च विजयं प्रासूतेन्दीवरात्मजा ।
विभावरी मेरुनन्दं प्रभावञ्च कलावती ॥ ६ ॥
पद्मिनी नाम या विद्या सर्व्वभोगोपपादिका ।
स तेषां तत्प्रभावेन पिता चक्रे पुरत्रयं ॥ ७ ॥
प्राच्यान्तु विजयं नाम कामरूपे नगोपरि ।
विजयाय सुतायादौ स ददौ पुरमुत्तमं ॥ ८ ॥
उदीच्यां मेरुनन्दस्य पुरीं नन्दवतीमिति ।
ख्यातां चकार प्रोत्तुङ्गवप्रप्राकारमालिनीं ॥ ९ ॥
कलावतीसुतस्यापि प्रभावस्य निवेशितं ।
पुरन्तालमिति ख्यातं दक्षिणापथमाश्रितं ॥ १० ॥
एवं निवेश्य पुत्त्रान् स पुरेषु पुरुषर्षभः ।
रेमे ताभिः समं विप्र मनोज्ञेष्वतिभूमिषु ॥ ११ ॥
एकदा तु गतोऽरण्ये विहरन् स धनुर्द्धरः ।
चकर्ष धनुरालोक्य वराहमतिदूरगं ॥ १२ ॥
अथाह काचिदभ्येत्य तं तदा हरिणाङ्गना ।
मय्येव पात्यतां बाणः प्रसीदेति पुनः पुनः ॥ १३ ॥

किमनेन हतेनाद्य मामाशु विनिपातय ।
त्वया निपातितो बाणो दुःखान्मां मोक्षयिष्यति ॥ १४ ॥

खरोचिरुवाच ॥

न ते शरीरं सरुजमस्माभिरुपलक्ष्यते ।
किन्नु तत्कारणं येन त्वं प्राणान् हातुमिच्छसि ॥ १५ ॥

मृग्युवाच ॥

अन्यास्वासक्तहृदये यस्मिंश्चेतः कृतास्पदं ।
मम तेन विना मृत्युरौषधं किमिहापरं ॥ १६ ॥

खरोचिरुवाच ॥

कस्त्वान्नाभिलषेद्भीरु सानुरागासि कुत्र वा ।
यदप्राप्तौ निजान् प्राणान् परित्यक्तुं व्यवस्यसि ॥ १७ ॥

मृग्युवाच ॥

त्वामेवेच्छामि भद्रन्ते त्वया मेऽपहृतं मनः ।
वृणोम्यहमतो मृत्युं मयि बाणो निपात्यतां ॥ १८ ॥

खरोचिरुवाच ॥

त्वं मृगी चञ्चलापाङ्गी नररूपधरा वयं ।
कथं त्वया समं योगो मद्विधस्य भविष्यति ॥ १९ ॥

मृग्युवाच ॥

यदि सापेक्षितञ्चित्तं मयि ते मां परिष्वज ।
यदि वा साधु चित्तन्ते करिष्यामि यथेप्सितं ॥
एतावताहं भवता भविष्याम्यतिमानिता ॥ २० ॥

मार्कण्डेय उवाच ॥

आलिलिङ्ग ततस्तां स स्वरोचिर्हरिणाङ्गनां ।
तेन चालिङ्गिता सद्यः साभूद्दिव्यवपुर्धरा ॥ २१ ॥
ततः स विस्मयाविष्टः का त्वमित्यभ्यभाषत ।
सा चास्मै कथयामास प्रेमलज्जाजडाक्षरं ॥ २२ ॥
अहमभ्यर्थिता देवैः काननस्यास्य देवता ।
उत्पादनीयो हि मनुस्त्वया मयि महामते ॥ २३ ॥
प्रीतिमत्यां मयि सुतं भूर्लोकपरिपालकं ।
तमुत्पादय देवानां त्वामहं वचनाद्वदे ॥ २४ ॥

मार्कण्डेय उवाच ॥

ततः स तस्यान्तनयं सर्व्वलक्षणलक्षितं ।
तेजस्विनमिवात्मानं जनयामास तत्क्षणात् ॥ २५ ॥
जातमात्रस्य तस्याथ देववाद्या निसस्वनुः ।
जगुर्गन्धर्व्वपतयो नन्तुश्चाप्सरोगणाः ॥ २६ ॥
सिषिचुः शीकरैर्नागा ऋषयश्च तपोधनाः ।
देवाश्च पुष्पवर्षञ्च मुमुचुश्च समन्ततः ॥ २७ ॥
तस्य तेजः समालोक्य नाम चक्रे पिता स्वयं ।
द्युतिमानिति येनास्य तेजसा भासिता दिशः ॥ २८ ॥
स बालो द्युतिमान्नाम महाबलपराक्रमः ।
स्वरोचिषः सुतो यस्मात्तस्मात् स्वारोचिषोऽभवत् ॥ २९ ॥
स चापि विचरन्रम्ये कदाचिद्गिरिनिर्झरे ।
स्वरोचिर्ददृशे हंसं निजपत्नीसमन्वितं ॥ ३० ॥

उवाच स तदा हंसीं साभिलाषां पुनः पुनः ।
उपसंह्रियतामात्मा चिरन्ते क्रीडितं मया ॥ ३१ ॥
किं सर्व्वकालं भोगैस्ते आसन्नञ्चरमं वयः ।
परित्यागस्य कालो मे तव चापि जलेचरि ॥ ३२ ॥

हंस्युवाच ॥

अकालः को हि भोगानां सर्व्वं भोगात्मकं जगत् ।
यज्ञाः क्रियन्ते भोगार्थं ब्राह्मणैः संयतात्मभिः ॥ ३३ ॥
दृष्टादृष्टांस्तथा भोगान् वाञ्छमाना विवेकिनः ।
दानानि च प्रयच्छन्ति पूर्त्तधर्म्मांश्च कुर्व्वते ॥ ३४ ॥
स त्वं नेच्छसि किं भोगान् भोगश्चेष्टाफलं नृणां ।
विवेकिनां तिरश्चाञ्च किं पुनः संयतात्मनां ॥ ३५ ॥

हंस उवाच ॥

भोगेष्वसक्तचित्तानां परमात्मान्विता मतिः ।
भविष्यति कदा सङ्गमुपेतानाञ्च बन्धुषु ॥ ३६ ॥
पुत्त्रमित्त्रकलत्रेषु सक्ताः सीदन्ति जन्तवः ।
सरःपङ्कार्णवे मग्ना जीर्णा वनगजा इव ॥ ३७ ॥
किं न पश्यसि वा भद्रे जातसङ्गं स्वरोचिषं ।
आबाल्यात्कामसंसक्तं मग्नं स्नेहाम्बुकर्द्दमे ॥ ३८ ॥
यौवनेऽतीव भार्य्यासु साम्प्रतं पुत्त्रनप्तृषु ।
स्वरोचिषो मनो मग्नमुद्धारं प्राप्स्यते कुतः ॥ ३९ ॥
नाहं स्वरोचिषस्तुल्यः स्त्रीवाध्यो वा जलेचरि ।
विवेकवांश्च भोगानां निवृत्तोऽस्मि च साम्प्रतं ॥ ४० ॥

मार्कण्डेय उवाच ॥

स्वरोचिरेतदाकर्ण्य जातोद्वेगः स्वगेरितं ।
आदाय भार्य्यास्तपसे ययावन्यत्तपोवनं ॥ ४१ ॥
तत्र तस्या तपो घोरं सह ताभिरुदारधीः ।
जगाम लोकानमलान्निष्टत्ताखिलकल्मषः ॥ ४२ ॥

इति श्रीमार्कण्डेयपुराणे स्वारोचिषे मन्वन्तरे ॥ ६६ ॥

सप्तषष्टितमोऽध्यायः ।

मार्कण्डेय उवाच ॥

ततः स्वारोचिषं नाम्ना द्युतिमन्तं प्रजापतिं ।
मनुञ्चकार भगवांस्तस्य मन्वन्तरं शृणु ॥ १ ॥
तत्रान्तरे तु ये देवा मुनयस्तत्सुताश्च ये ।
भूपालाः क्रोष्टके ये तान् गदतस्त्वं निशामय ॥ २ ॥
देवाः पारावतास्तत्र तथैव तुषिता द्विज ।
स्वारोचिषेऽन्तरे चेन्द्रो विपश्चिदिति विश्रुतः ॥ ३ ॥
ऊर्ज्जस्तम्बस्तथा प्राणो दत्तोलिऋर्षभस्तथा ।
निश्चरश्चार्व्वीरांश्च तत्र सप्तर्षयोऽभवन् ॥ ४ ॥
चैत्रकिंपुरुषाद्याश्च सुतास्तस्य महात्मनः ।
सप्तासन् सुमहावीर्य्याः पृथिवीपरिपालकाः ॥ ५ ॥
तस्य मन्वन्तरं यावत्तावत्तद्वंशविस्तरे ।
भुक्तेयमवनिः सर्व्वा द्वितीयं वै तदन्तरं ॥ ६ ॥

स्वरोचिषस्तु चरितं जन्म स्वारोचिषस्य च ।
निशम्य मुच्यते पापैः श्रद्दधानो हि मानवः ॥ ७ ॥

इति श्रीमार्कण्डेयपुराणे स्वारोचिषं समाप्तं ॥ ६७ ॥

अष्टषष्टितमोऽध्यायः ॥

कौष्टुकिरुवाच ॥

भगवन् कथितं सर्व्वं विस्तरेण त्वया मम ।
स्वरोचिषस्तु चरितं जन्म स्वारोचिषस्य तु ॥ १ ॥
या तु सा पद्मिनी नाम विद्या भोगोपपादिका ।
तत्संश्रया ये निधयस्तान् मे विस्तरतो वद ॥ २ ॥
अष्टौ ये निधयस्तेषां स्वरूपं द्रव्यसंस्थितिः ।
भवताभिहितं सम्यक् श्रोतुमिच्छाम्यहं गुरो ॥ ३ ॥

मार्कण्डेय उवाच ॥

पद्मिनी नाम या विद्या लक्ष्मीस्तस्याश्च देवता ।
तदाधाराश्च निधयस्तन्मे निगदतः शृणु ॥ ४ ॥
यत्र पद्ममहापद्मौ तथा मकरकच्छपौ ।
मुकुन्दो नन्दकश्चैव नीलः शङ्खोऽष्टमो निधिः ॥ ५ ॥
सत्यामृद्धौ भवन्त्येते सिद्धिस्तेषां हि जायते ।
एते ह्यष्टौ समाख्याता निधयस्तव क्रौष्टुके ॥ ६ ॥
देवतानां प्रसादेन साधुसंसेवनेन च ।
एभिरालोकितं वित्तं मानुषस्य सदा मुने ॥ ७ ॥

यादृक् स्वरूपं भवति तन्मे निगदतः शृणु ।
पद्मो नाम निधिः पूर्व्वं मयस्य भवति द्विज ॥ ८ ॥
सुतस्य तत्सुतानाञ्च तत्पौत्राणाञ्च नित्यशः ।
दाक्षिण्यसारं पुरुषस्तेन चाधिष्ठितो भवेत् ॥ ९ ॥
सत्त्वाधारो महाभोगो यतोऽसौ सात्त्विको निधिः ।
सुवर्णरूप्यताम्रादिधातूनाञ्च परिग्रहं ॥ १० ।
करोत्यतितरां सोऽथ तेषाञ्च क्रयविक्रयं ।
करोति च तथा यज्ञान् दक्षिणाञ्च प्रयच्छति ॥ ११ ॥
सभां देवनिकेतांश्च स कारयति तन्मनाः ।
सत्त्वाधारो निधिश्चान्यो महापद्म इति श्रुतः ॥ १२ ॥
सत्त्वप्रधानो भवति तेन चाधिष्ठितो नरः ।
करोति पद्मरागादिरत्नानाञ्च परिग्रहं ॥ १३ ॥
मौक्तिकानां प्रबालानां तेषां च क्रयविक्रयान् ।
ददाति योगशीलेभ्यस्तेषामावसथांस्तथा ॥ १४ ॥
स कारयति तच्छीलः स्वयमेव च जायते ।
तत्प्रसूतास्तथाशीलाः पुत्रपौत्रक्रमेण च ॥ १५ ॥
पूर्व्वाह्णमाचः सप्तासौ पुरुषांश्च न मुञ्चति ।
तामसो मकरो नाम निधिस्तेनावलोकितः ॥ १६ ॥
पुरुषोऽथ तमःप्रायः सुशीलोऽपि हि जायते ।
बाणखड्गर्ष्टिधनुषां चर्म्मणाञ्च परिग्रहं ॥ १७ ॥
रसनानाञ्च कुरुते याति मैत्रीञ्च राजभिः ।
ददाति शौर्य्यवृत्तीनां भूभुजां ये च तत्प्रियाः ॥ १८ ॥

क्रयविक्रये च शस्त्राणां नान्यत्र प्रीतिमेति च ।
एकस्यैव भवत्येष नच तस्यानुयानुगः ॥ १९ ॥
द्रव्यार्थं दस्युतो नाशं संग्रामे चापि सव्रजे ।
कच्छपश्च निधिर्योऽसौ नरस्तेनाभिवीक्षितः ॥ २० ॥
तमःप्रधानो भवति यतोऽसौ तामसो निधिः ।
व्यवहारानशेषांस्तु पुण्यजातैः करोति च ॥ २१ ॥
कर्म्मस्थानखिलांश्चैव न विश्वसिति कस्यचित् ।
समस्तानि यथाङ्गानि संहरत्येव कच्छपः ॥ २२ ॥
तथारिष्टस्वचित्तानि तिष्ठत्यायतमानसः ।
न ददाति न वा भुंक्ते तद्विनाशभयाकुलः ॥ २३ ॥
निधानमुर्व्व्यां कुरुते निधिः सोऽप्येकपूरुषः ।
रजोगुणमयश्चान्यो मुकुन्दो नाम यो निधिः ॥ २४ ॥
नरोऽवलोकितस्तेन तद्गुणो भवति द्विज ।
वीणावेणुमृदङ्गानामातोद्यस्य परिग्रहं ॥ २५ ॥
करोति गायतां वित्तं नृत्यताञ्च प्रयच्छति ।
बन्दिनामथ सूतानां विटानां लास्यपाठिनां ॥ २६ ॥
ददात्यहर्निशं भोगान् भुंक्ते तैश्च समं द्विज ।
कुलटास्वरतिश्चास्य भवत्यन्यैश्च तद्विधैः ॥ २७ ॥
प्रयाति सङ्गमेकञ्च यं निधिर्भजते नरं ।
रजस्तमोमयश्चान्यो नन्दो नाम महानिधिः ॥ २८ ॥
उपैति स्तम्भमधिकं नरस्तेनावलोकितः ।
समस्तधातुरत्नानां पुण्यधान्यादिकस्य च ॥ २९ ॥

परिग्रहं करोत्येष तथैव क्रयविक्रयं ।
आधारः स्वजनानाञ्च आगताभ्यागतस्य च ॥ ३० ॥
सहते नापमानोक्तिं स्वल्पामपि महामुने ।
स्तूयमानश्च महतीं प्रीतिं बध्नाति गच्छति ॥ ३१ ॥
यं यमिच्छति वै कामं मृदुत्वमुपयाति च ।
बह्व्यो भार्य्या भवन्त्यस्य सूतिमत्योऽतिशोभनाः ॥ ३२ ॥
एतये सप्त च नरान्निधिर्नन्दोऽनुवर्त्तते ।
प्रवर्द्धमानोऽथनरमष्टभागेन सत्तम ॥ ३३ ॥
दीर्घायुष्ट्वञ्च सर्व्वेषां पुरुषाणां प्रयच्छति ।
बन्धूनामेव भरणं ये च दूरादुपागताः ॥ ३४ ॥
तेषां करोति वै नन्दः परलोके न चादृतः ।
भवत्यस्य नच स्नेहः सहवासिषु जायते ॥ ३५ ॥
पूर्व्वमित्रेषु शैथिल्यं प्रीतिमन्यैः करोति च ।
तथैव सत्त्वरजसी यो बिभर्त्ति महानिधिः ॥ ३६ ॥
सशीलसंज्ञस्तत्सङ्गी नरस्तच्छीलवान् भवेत् ।
वस्त्रकार्पासधान्यादिफलपुष्पपरिग्रहं ॥ ३७ ॥
मुक्ताविद्रुमशङ्खानां शुक्त्यादीनां तथा मुने ।
काष्ठादीनां करोत्येष यच्चान्यज्जलसम्भवं ॥ ३८ ॥
क्रयविक्रयमन्येषां नान्यत्र रमते मनः ।
तडागान् पुष्करिण्योऽथ तथारामान् करोति च ॥ ३९ ॥
बन्धञ्च सरितां वृक्षांस्तथारोपयते नरः ।
अनुलेपनपुष्पादि भोगं भुङ्क्ताभिजायते ॥ ४० ॥

त्रिपौरूपश्चापि निधिर्नीलो नामैष जायते ।
रजस्तमोमयश्चान्यः शङ्खसंज्ञो हि यो निधिः ॥ ४१ ॥
तेनापि नीयते विप्र तद्गुणित्वं निधीश्वरः ।
एकस्यैव भवत्येष नरं नान्यमुपैति च ॥ ४२ ॥
यस्य शङ्खो निधिस्तस्य स्वरूपं क्रौष्टुके शृणु ।
एक एवात्मना सृष्टमन्नं भुंक्ते तथाम्बरं ॥ ४३ ॥
कदन्नभुक् परिजनो नच शोभनवस्त्रधृक् ।
न ददाति सुहृद्भार्य्याभ्रातृपुत्त्रस्नुषादिषु ॥ ४४ ॥
स्वपोषणपरः शङ्खी नरो भवति सर्व्वदा ।
इत्येते निधयः ख्याता नराणामर्थदेवताः ॥ ४५ ॥
मिश्रावलोकनान्मिश्राः स्वभावफलदायिनः ।
यथा ख्यातस्वभावस्तु भवत्येव विलोकनात् ॥
सर्व्वेषामाधिपत्ये च श्रीरेषा द्विजपद्मिनी ॥ ४६ ॥

इति श्रीमार्कण्डेयपुराणे निधिनिर्णयो नाम ॥ ६८ ॥

ऊनसप्ततितमोऽध्यायः ॥

क्रोष्टुकिरुवाच ॥

विस्तरात् कथितं ब्रह्मन् मम स्वारोचिषंत्वया ।
मन्वन्तरं तथैवाष्टौ ये पृष्टा निधयो मया ॥ १ ॥
स्वायम्भुवं पूर्व्वमेव मन्वन्तरमुदाहृतं ।
मन्वन्तरं तृतीयं मे कथयोत्तमसंज्ञितं ॥ २ ॥

मार्कण्डेय उवाच ॥

उत्तानपादपुत्त्रोऽभूदुत्तमो नाम नामतः ।
सुरुच्यास्तनयः ख्यातो महाबलपराक्रमः ॥ ३ ॥
धर्म्मात्मा च महात्मा च पराक्रमधनो नृपः ।
अतीत्य सर्व्वभूतानि बभौ भानुपराक्रमः ॥ ४ ॥
समः शत्त्रौ च मित्त्रे च पुरे पुत्त्रे च धर्म्मवित् ।
दुष्टे च यमवत्साधौ सोमवच्च महामने ॥ ५ ॥
बाभ्रव्यां बहुलां नाम उपयेमे स धर्म्मवित् ।
उत्तानपादतनयः शचीमिन्द्रइवोत्तमः ॥ ६ ॥
ख्यातामतीव तस्यासीद्द्विजवर्य्या मनः सदा ।
स्नेहवच्छशिनो यद्वद्रोहिण्यां निहितास्पदं ॥ ७ ॥
अन्यप्रयोजनासक्तिमुपैति न हि तन्मनः ।
स्वप्ने चैव तदालम्बि मनोऽभूत्तस्य भूभृतः ॥ ८ ॥
स च तस्याः सुचार्व्वङ्ग्या दर्शनादेव पार्थिवः ।
ददाति स्पर्शनं गात्त्रे गात्त्रस्पर्शे च तन्मयः ॥ ९ ॥
श्रोत्त्रोद्वेगकरं वाक्यं प्रियमप्यवनीपतेः ।
तस्यापि भूरि सम्मानं मेने परिभवन्ततः ॥ १० ॥
अवमेने स्रजं दत्तां शुभान्याभरणानि च ।
उत्तस्थावङ्गपीडेव पिबतोऽस्य वरासवं ॥ ११ ॥
भुञ्जता च नरेन्द्रेण क्षणमात्त्रं करे धृता ।
बभुजे स्वल्पकं भक्ष्यं द्विज नातिमुदावती ॥ १२ ॥
एवं तस्यानुकूलस्य नानुकूला महात्मनः ।

प्रभूततरमत्यर्थं चक्रे रागं महीपतिः ॥ १३ ॥
अथ पानगतो भूपः कदाचित्तां मनस्विनीं ।
सुरापूतं पानपात्रं ग्राहयामास सादरः ॥ १४ ॥
पश्यतां भूमिपालानां वारमुख्यैः समन्वितः ।
प्रगीयमानमधुरैर्गेयगायनतत्परैः ॥ १५ ॥
सा तु नेच्छति तत्पात्रमादातुं तत्पराङ्मुखी ।
समक्षमवनीशानां ततः क्रुद्धः स पार्थिवः ॥ १६ ॥
उवाच द्वाःस्थमाहूय निश्वसन्नुरगो यथा ।
निराकृतस्तया देव्या प्रियया पतिरप्रियः ॥ १७ ॥
द्वाःस्थैनां दुष्टहृदयामादाय विजने वने ।
परित्यजाशु नैतत्ते विचार्य्यं वचनं मम ॥ १८ ॥

मार्कण्डेय उवाच ॥

ततो नृपस्य वचनमविचार्य्यमवेक्ष्य सः ।
द्वाःस्थस्तत्याज तां सुभ्रुमारोप्य स्यन्दने वने ॥ १९ ॥
सा च तं विपिने त्यागं नीता तेन महीभृता ।
अदृश्यमाना तं मेने परं कृतमनुग्रहं ॥ २० ॥
सोऽपि तत्रानुरागार्त्तिदह्यमानात्ममानसः ।
औत्तानपादिर्भूपालो नान्यां भार्य्यामविन्दत ॥ २१ ॥
सस्मार तां सुचार्व्वङ्गीमहर्निशमनिर्व्वृतः ।
चकार च निजं राज्यं प्रजा धर्म्मेण पालयन् ॥ २२ ॥
प्रजाः पालयतस्तस्य पितुः पुत्त्रानिवौरसान् ।
आगत्य ब्राह्मणः कश्चिदिदमाहार्त्तमानसः ॥ २३ ॥

ब्राह्मण उवाच ॥

महाराज भृशार्त्तोऽस्मि श्रूयतां गदतो मम ।
नृणामार्त्तिपरित्राणमन्यतो न नराधिपात् ॥ २४ ॥
मम भार्य्या प्रसुप्तस्य केनाप्यपहृता निशि ।
गृहद्वारमनुद्घाट्य तां समानेतुमर्हसि ॥ २५ ॥

राजोवाच ॥

न वेत्सि केनापहृता क्व वा नीता तु सा द्विज ।
यतामि विग्रहे कस्य कुतो वाप्यानयामि तां ॥ २६ ॥

ब्राह्मण उवाच ॥

तथैव स्थगिते द्वारि प्रसुप्तस्य महीपते ।
हृता हि भार्य्या किं केनेत्येतद्विज्ञायते भवान् ॥ २७ ॥
त्वं रक्षिता नो नृपते षड्भागादानवेतनः ।
धर्म्मस्य तेन निश्चिन्ताः स्वपन्ति मनुजा निशि ॥ २८ ॥

राजोवाच ॥

न ते दृष्टा मया भार्य्या यादृग्रूपा च देहतः ।
वयश्चैव समाख्याहि किंशीला ब्राह्मणी च ते ॥ २९ ॥

ब्राह्मण उवाच ॥

कठोरनेत्रा सात्युच्चा ह्रस्वबाहुः कृशानना ।
विरूपरूपा भूपाल न निन्दामि तथैव तां ॥ ३० ॥
वाचि भूपातिपरुषा न सौम्या सा च शीलतः ।
इत्याख्याता मया भार्य्या साकारा दुर्निरीक्षणा ॥ ३१ ॥
मनागतीतं भूपाल तस्याश्च प्रथमं वयः ।

तादृग्रूपा हि मे भार्य्या सत्यमेतन्मयोदितं ॥ ३२ ॥

राजोवाच ॥

अलन्ते ब्राह्मण तया भार्य्यामन्यां ददामि ते ।
सुखाय भार्य्या कल्याणी दुःखहेतुर्हि तादृशी ॥ ३३ ॥
कल्ये सुरूपता विप्र कारणं शीलमुत्तमं ।
रूपशीलविहीना या त्याज्या सा तेन हेतुना ॥ ३४ ॥

ब्राह्मण उवाच ॥

रक्ष्या भार्य्या महीपाल इति न श्रुतिरुत्तमा ।
भार्य्यायां रक्षमाणायां प्रजा भवति रक्षिता ॥ ३५ ॥
आत्मा हि जायते तस्यां सा रक्ष्यातो नरेश्वर ।
प्रजायां रक्षमाणायामात्मा भवति रक्षितः ॥ ३६ ॥
तस्यामरक्षमाणायां भविता वर्णसङ्करः ।
स पातयेन्महीपाल पूर्व्वान् स्वर्गादधःपितॄन् ॥ ३७ ॥
धर्म्महानिश्चानुदिनमभार्य्यस्य भवेन्मम ।
नित्यक्रियाणां विभ्रंशात् स चापि पतनाय मे ॥ ३८ ॥
तस्याञ्च पृथिवीपाल भवित्री मम सन्ततिः ।
तव षड्भागदात्री सा भवित्री धर्म्महेतुकी ॥ ३९ ॥
तदेतत्ते मयाख्याता पत्नी या मे हृता प्रभो ।
तां समानय रक्षायां भवानधिकृतो यतः ॥ ४० ॥

मार्कण्डेय उवाच ॥

स तस्यैवं वचःश्रुत्वा विमृष्य च नरेश्वरः ।
सर्व्वोपकरणैर्युक्तमारुरोह महारथं ॥ ४१ ॥

इतश्चेतश्च तेनासौ परिबभ्राम मेदिनीं ।
ददर्श च महारण्ये तापसाश्रममुत्तमं ॥ ४२ ॥
अवतीर्य्य च तत्रासौ प्रविश्य ददृशे मुनिं ।
कौश्यां वृष्यां समासीनं ज्वलन्तमिव तेजसा ॥ ४३ ॥
स दृष्ट्वा नृपतिं प्राप्तं समुत्थाय त्वरान्वितः ।
संमान्य स्वागतेनैव शिष्यमाहार्घ्यमानय ॥ ४४ ॥
तमाह शिष्यः शनकैर्दातव्योऽर्घ्योऽस्य किं मुने ।
तदाज्ञापय सञ्चिन्त्य तवाज्ञां हि करोम्यहं ॥ ४५ ॥
ततोऽवगतवृत्तान्तो भूपतेस्तस्य स द्विजः ।
सम्भाषासनदानेन चक्रे सम्मानमात्मवान् ॥ ४६ ॥

ऋषिरुवाच ॥

किं निमित्तमिहायातो भवान् किन्ते चिकीर्षितं ।
उत्तानपादतनयं वेद्मि त्वामुत्तमं नृप ॥ ४७ ॥

राजोवाच ॥

ब्राह्मणस्य गृहाद्भार्य्या केनाप्यपहृता मुने ।
अविज्ञातस्वरूपेण तामन्वेष्टुमिहागतः ॥ ४८ ॥
पृच्छामि यत्ते तन्मे त्वं प्रणतस्यानुकम्पया ।
अभ्यागतस्याथ गृहं भगवन् वक्तुमर्हसि ॥ ४९ ॥

ऋषिरुवाच ॥

पृच्छ मामवनीपाल यत्प्रष्टव्यमशङ्कितः ।
वक्तव्यञ्चेत्तव मया कथयिष्यामि तत्त्वतः ॥ ५० ॥

राजोवाच ॥

गृहागताय यो मह्यं प्रथमे दर्शने मुने ।
त्वया समुद्यतो दातुं कथं सोऽर्घ्यो निवर्त्तितः ॥ ५१ ॥

ऋषिरुवाच ॥

त्वद्दर्शनेन रभसादाज्ञप्तोऽयं मया नृप ।
यदा तदाहमेतेन शिष्येण प्रतिबोधितः ॥ ५२ ॥
एष वेत्ति जगत्यत्र मत्प्रसादादनागतं ।
यथाहं समतीतञ्च वर्त्तमानञ्च सर्व्वतः ॥ ५३ ॥
आलोच्याज्ञापयेत्युक्ते ततो ज्ञातं मयापि तत् ।
ततो न दत्तवानर्घ्यमहं तुभ्यं विधानतः ॥ ५४ ॥
सत्यं राजन् त्वमर्घ्यार्हः कुले स्वायम्भुवस्य च ।
तथापि नार्घ्ययोग्यं त्वां मन्यामो वयमुत्तमं ॥ ५५ ॥

राजोवाच ॥

किं कृतं हि मया ब्रह्मन् ज्ञानादज्ञानतो पि वा ।
येन त्वत्तोऽर्घ्यमर्हामि नाहमभ्यागतश्चिरात् ॥ ५६ ॥

ऋषिरुवाच ॥

किं विस्मृतन्ते यत्पत्नी त्वया त्यक्ता च कानने ।
परित्यक्तस्तया सार्द्धं त्वया धर्म्मो नृपाखिलः ॥ ५७ ॥
पक्षेण कर्म्मणो ह्यन्या प्रयात्यस्पर्शतान्नरः ।
विण्मूत्रैर्व्वार्षिकी यस्य हानिस्ते नित्यकर्म्मणः ॥ ५८ ॥
पत्न्यानुकूलया भाव्यं यथाशीलेऽपि भर्त्तरि ।
दुःशीलापि तथा भार्य्या पोषणीया नरेश्वर ॥ ५९ ॥

प्रतिकूला हि सा पत्नी तस्य विप्रस्य या हृता ।
तथापि धर्म्मकामोऽसौ त्वामुद्यातितरां नृप ॥ ६० ॥
चलतः स्थापयस्यन्यान् स्वधर्म्मेषु महीपते ।
त्वां स्वधर्म्माद्विचलितं कोऽपरः स्थापयिष्यति ॥ ६१ ॥

मार्कण्डेय उवाच ॥

विलक्ष्यः स महीपाल इत्युक्तस्तेन धीमता ।
तथेत्युक्त्वा च पप्रच्छ हृतां पत्नीं द्विजन्मनः ॥ ६२ ॥
भगवन् केन नीता सा पत्नी विप्रस्य कुत्र वा ।
अतीतानागतं वेत्ति जगत्यवितथं भवान् ॥ ६३ ॥

ऋषिरुवाच ॥

तां जहाराद्रितनयो वलाको नाम राक्षसः ।
द्रक्ष्यसे चाद्य तां भूप उत्पलावतके वने ॥ ६४ ॥
गच्छ संयोजयाशु त्वं भार्य्यया हि द्विजोत्तमं ।
मा पापास्पदतां यातु त्वमिवासौ दिने दिने ॥ ६५ ॥

इति श्रीमार्कण्डेयपुराणे औत्तानमन्वन्तरे ॥ ६९ ॥

सप्ततितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

अथारुरोह स्वरथं प्रणिपत्य महामुनिं ।
तेनाख्यातं वनन्तच्च प्रययावुत्पलावतं ॥ १ ॥

यथाख्यातस्वरूपाञ्च भार्य्यां भर्त्ता द्विजस्य तां ।
भक्षयन्तीं ददर्शाथ श्रीफलानि नरेश्वरः ॥ २ ॥
पप्रच्छ च कथं भद्रे त्वमेतद्वनमागता ।
स्फुटं ब्रवीहि वैशालेरपि भार्य्या सुशर्म्मणः ॥ ३ ॥

ब्राह्मण्युवाच ॥

सुताहमतिरात्रस्य द्विजस्य वनवासिनः ।
पत्नी विशालपुत्रस्य यस्य नाम त्वयोदितं ॥ ४ ॥
साहं हृता बलाकेन राक्षसेन दुरात्मना ।
प्रसुप्ता भवनस्यान्ते भ्रातृमातृवियोजिता ॥ ५ ॥
भस्मीभवतु तद्रक्षो येनास्म्येवं वियोजिता ।
मात्रा भ्रातृभिरन्यैश्च तिष्ठाम्यत्र सुदुःखिता ॥ ६ ॥
अस्मिन् वनेऽतिगहने तेनानीयाहमुज्झिता ।
न वेद्मि कारणं किं तन्नोपभुंक्ते न खादति ॥ ७ ॥

राजोवाच ॥

अपि तज्ज्ञायते रक्षस्त्वामुत्सृज्य क्व वै गतं ।
अहं भर्त्ता तवैवात्र प्रेषितो द्विजनन्दिनि ॥ ८ ॥

ब्राह्मण्युवाच ॥

अस्यैव काननस्यान्ते स तिष्ठति निशाचरः ।
प्रविश्य पश्यतु भवान् न बिभेति ततो यदि ॥ ९ ॥

मार्कण्डेय उवाच ॥

प्रविवेश ततः सोऽथ तया वर्त्मनि दर्शिते ।
ददृशे परिवारेण समवेतञ्च राक्षसं ॥ १० ॥

दृष्टमात्रे ततस्तस्मिन् त्वरमाणः स राक्षसः ।
दूरादेव महीं मूर्ध्ना स्पृशन् पादान्तिकं ययौ ॥ ११ ॥

राक्षस उवाच ॥

ममात्रागच्छता गेहं प्रसादस्ते महान् कृतः ।
प्रशाधि किं करोम्येष वसामि विषये तव ॥ १२ ॥
अर्घ्यञ्चेमं प्रतीच्छ त्वं स्थीयताञ्चेदमासनं ।
वयं भृत्या भवान् स्वामी दृढमाज्ञापयस्व मां ॥ १३ ॥

राजोवाच ॥

कृतमेव त्वया सर्व्वं सर्व्वमेवातिथिक्रियां ।
किमर्थं ब्राह्मणबधूस्त्वयानीता निशाचर ॥ १४ ॥
नेयं सुरूपा सन्त्यन्या भार्य्यार्थञ्चेत् हृता त्वया ।
भक्ष्यार्थं चेत्कथं नात्ता त्वयैतत्कथ्यतां मम ॥ १५ ॥

राक्षस उवाच ॥

न वयं मानुषाहारा अन्ये ते नृप राक्षसाः ।
सुकृतस्य फलं यत्तु तदश्नीमो वयं नृप ॥ १६ ॥
स्वभावञ्च मनुष्याणां योषिताञ्च विमानिताः ।
मानिताश्च समश्नीमो न वयं जन्तुखादकाः ॥ १७ ॥
यदस्माभिर्नृणां क्षान्तिर्भुक्ता क्रुध्यन्ति ते तदा ।
भुक्ते दुष्टे स्वभावे च गुणवन्तो भवन्ति च ॥ १८ ॥
सन्ति नः प्रमदा भूप रूपेणाप्सरसां समाः ।
राक्षस्यस्तासु तिष्ठत्सु मानुषीषु रतिः कथं ॥ १९ ॥

राजोवाच ॥

यद्येषा नोपभोगाय नाहाराय निशाचर ।
गृहं प्रविश्य विप्रस्य तत्किमेषा हृता त्वया ॥ २० ॥

राक्षस उवाच ॥

मन्त्रवित् स द्विजश्रेष्ठो यज्ञे यज्ञे गतस्य मे ।
रक्षोघ्नमन्त्रपठनात् करोत्युच्चाटनं नृप ॥ २१ ॥
वयं बुभुक्षितास्तस्य मन्त्रोच्चाटनकर्म्मणा ।
क्व यामः सर्व्वयज्ञेषु स ऋत्विग्भवति द्विज ॥ २२ ॥
ततोऽस्माभिरिदन्तस्य वैकल्यमुपपादितं ।
पत्न्या विना पुमानिज्याकर्म्मयोग्यो न जायते ॥ २३ ॥

मार्कण्डेय उवाच ॥

वैकल्योच्चारणात्तस्य ब्राह्मणस्य महामतेः ।
ततः स राजातिभृशं विषण्णः समजायत ॥ २४ ॥
वैकल्यमेव विप्रस्य वदन्मामेव निन्दति ।
अनर्हमर्घस्य च मां सोऽप्याह मुनिसत्तमः ॥ २५ ॥
वैकल्यं तस्य विप्रस्य राक्षसोऽप्याह मे यथा ।
अपत्नीकतया सोऽहं सङ्कटं महदास्थितः ॥ २६ ॥

मार्कण्डेय उवाच ॥

एवं चिन्तयतस्तस्य पुनरप्याह राक्षसः ।
प्रणामनम्रो राजानं बद्धाञ्जलिपुटो मुने ॥ २७ ॥
नरेन्द्राज्ञाप्रदानेन प्रसादः क्रियतां मम ।
भृत्यस्य प्रणतस्य त्वं युष्मद्विषयवासिनः ॥ २८ ॥

राजोवाच ॥

स्वभावं वयमश्नीमस्त्वयोक्तं यन्निशाचर ।
तदर्थिनो वयं येन कार्य्येण शृणु तन्मम ॥ २९ ॥
अस्यास्त्वयाद्य ब्राह्मण्या दौःशील्यमपभुज्यतां ।
येन त्वयात्तदौःशील्या तद्विनीता भवेदियं ॥ ३० ॥
नीयतां यस्य भार्य्येयं तस्य वेश्म निशाचर ।
अस्मिन् कृते कृतं सर्व्वं गृहमभ्यागतस्य मे ॥ ३१ ॥

मार्कण्डेय उवाच ॥

ततः स राक्षसस्तस्याः प्रविश्यान्तः स्वमायया ।
भक्षयामास दौःशील्यं निजशक्त्या नृपाज्ञया ॥ ३२ ॥
दौःशील्येनातिरौद्रेण पत्नी तस्य द्विजन्मनः ।
तेन सा सम्परित्यक्ता तमाह जगतीपतिं ॥ ३३ ॥
स्वकर्म्मफलपाकेन भर्त्तुस्तस्य महात्मनः ।
वियोजिताहं तद्धेतुरयमासीन्निशाचरः ॥ ३४ ॥
नास्य दोषो न वा तस्य मम भर्त्तुर्महात्मनः ।
ममैव दोषो नान्यस्य सुकृतं ह्युपभुज्यते ॥ ३५ ॥
अन्यजन्मनि कस्यापि विप्रयोगः कृतो मया ।
सोऽयं मयाप्युपगतः को दोषोऽस्य महात्मनः ॥ ३६ ॥

राक्षस उवाच ॥

प्रापयामि तवादेशादिमां भर्तृगृहं प्रभो ।
यदन्यत्करणीयन्ते तदाज्ञापय पार्थिव ॥ ३७ ॥

राजोवाच ॥

अस्मिन् कृते कृतं सर्व्वं त्वया मे रजनीचर ।
आगन्तव्यञ्च ते वीर कार्य्यकाले स्मृतेन मे ॥ ३८ ॥

मार्कण्डेय उवाच ॥

तथेत्युक्ता तु तद्रक्षस्तामादाय द्विजाङ्गनां ।
निन्ये भर्तृगृहं शुद्धां दौःशील्यापगमात्तदा ॥ ३९ ॥

इति श्रीमार्कण्डेयपुराणे औत्तानमन्वन्तरे ॥ ७० ॥

एकसप्ततितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

तां प्रेषयित्वा राजापि स्वभर्तृगृहमङ्गनां ।
चिन्तयामास निःश्वस्य किमत्र सुकृतं भवेत् ॥ १ ॥
अनर्घयोग्यताकष्टं स मामाह महामनाः ।
वैकल्यं विप्रमुद्दिश्य तथाहार्यं निशाचरः ॥ २ ॥
सोऽहं कथं करिष्यामि त्यक्ता पत्नी मया हि सा ।
अथवा ज्ञानदृष्टिं तं पृच्छामि मुनिसत्तमं ॥ ३ ॥
सञ्चिन्त्येत्थं स भूपालः समारुह्य च तं रथं ।
ययौ यत्र स धर्म्मात्मा त्रिकालज्ञो महामुनिः ॥ ४ ॥
अवरुह्य रथात्सोऽथ तं समेत्य प्रणम्य च ।
यथा वृत्तं समाचख्यौ राक्षसेन समागमं ॥ ५ ॥

ब्राह्मण्या दर्शनञ्चैव दौःशील्यापगमं तथा ।
प्रेषणं भर्तृगेहे च कार्य्यमागमने च यत् ॥ ६ ॥

ऋषिरुवाच ॥

ज्ञातमेतन्मया पूर्व्वं यत् कृतन्ते नराधिप ।
कार्य्यमागमने चैव मत्समीपे तवाखिलं ॥ ७ ॥
पृच्छ मामिह किं कार्य्यं मयेत्युद्विग्नमानसः ।
त्वय्यागते महीपाल शृणु कार्य्यञ्च यत्त्वया ॥ ८ ॥
पत्नी धर्म्मार्थकामानां कारणं प्रबलं नृणां ।
विशेषतश्च धर्म्मश्च सन्त्यक्तस्त्यजता हि तां ॥ ९ ॥
अपत्नीको नरो भूप न योग्यो निजकर्म्मणां ।
ब्राह्मणः क्षत्रियो वापि वैश्यः शूद्रोऽपि वा नृप ॥ १० ॥
त्यजता भवता पत्नीं न शोभनमनुष्ठितं ।
अत्याज्यो हि यथा भर्त्ता स्त्रीणां भार्य्या तथा नृणां ॥ ११ ॥

राजोवाच ॥

भगवन् किं करोम्येष विपाको मम कर्म्मणां ।
नानुकूलानुकूलस्य यस्मात्त्यक्ता ततो मया ॥ १२ ॥
यद्यत्करोति तत्क्षान्तं दह्यमानेन चेतसा ।
भगवंस्तद्वियोगार्त्तिविभीतेनान्तरात्मना ॥ १३ ॥
साम्प्रतं तु वने त्यक्ता न वेद्मि क्व नु सा गता ।
भक्षिता वापि विपिने सिंहव्याघ्रनिशाचरैः ॥ १४ ॥

ऋषिरुवाच ॥

न भक्षिता सा भूपाल सिंहव्याघ्रनिशाचरैः ।

सा त्वविप्लुतचारित्रा साम्प्रतन्तु रसातले ॥ १५ ॥

राजोवाच ॥

सा नीता केन पातालमास्ते साऽदूषिता कथं ।
अत्यद्भुतमिदं ब्रह्मान् यथावद्वक्तुमर्हसि ॥ १६ ॥

ऋषिरुवाच ॥

पाताले नागराजोऽस्ति प्रख्यातश्च कपोतकः ।
तेन दृष्टा त्वया त्यक्ता भ्रममाणा महावने ॥ १७ ॥
सा रूपशालिनी तेन सानुरागेन पार्थिव ।
वेदितार्थेन पातालं नीता सा युवती तदा ॥ १८ ॥
ततस्तस्य सुता सुभ्रूर्नन्दा नाम महीपते ।
भार्य्या मनोरमा चास्य नागराजस्य धीमतः ॥ १९ ॥
तया मातुः सपत्नीयं सा भविचीति शोभना ।
दृष्टा स्वगेहं सा नीता गुप्ता चान्तःपुरे शुभा ॥ २० ॥
यदा तु याचिता नन्दा न ददाति न्टपोत्तरं ।
मूका भविष्यसीत्याह तदा तां तनयां पिता ॥ २१ ॥
एवं शप्ता सुता तेन सा चास्ते तत्र भूपते ।
नीता तेनोरगेन्द्रेण धृता तत्सुतया सती ॥ २२ ॥

मार्कण्डेय उवाच ॥

ततो राजा परं हर्षमवाप्य तमपृच्छत ।
द्विजवर्य्यं स्वदौर्भाग्यकारणं दयितां प्रति ॥ २३ ॥

राजोवाच ॥

भगवन् सर्व्वलोकस्य मयि प्रीतिरनुत्तमा ।

किन्नु तत्कारणं येन स्वपत्नी नातिवत्सला ॥ २४ ॥
मम चासावतीवेष्टा प्राणेभ्योऽपि महामुने ।
सा च मां प्रति दुःशीला ब्रूहि यत्कारणं द्विज ॥ २५ ॥

ऋषिरुवाच ॥

पाणिग्रहणकाले त्वं सूर्य्यभौमशनैश्चरैः ।
शुक्रवाचस्पतिभ्याञ्च तव भार्य्यावलोकिता ॥ २६ ॥
तन्मुहूर्तेऽभवच्चन्द्रस्तस्याः सोमसुतस्तथा ।
परस्परविपक्षौ तौ ततः पार्थिव ते भृशं ॥ २७ ॥
तद्गच्छ त्वं स्वधर्म्मेण परिपालय मेदिनीं ।
पत्नीसहायः सर्व्वाश्च कुरु धर्म्मवतीः क्रियाः ॥ २८ ॥

मार्कण्डेय उवाच ॥

इत्युक्ते प्रणिपत्यैनमारुह्य स्यन्दनं ततः ।
उत्तमः पृथिवीपाल आजगाम निजं पुरं ॥ २९ ॥

इति श्रीमार्कण्डेयपुराणे औत्तम मन्वन्तरे ॥ ७१ ॥

द्विसप्ततितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

ततः स्वनगरं प्राप्य तं ददर्श द्विजं नृपः ।
समेतं भार्य्यया चैव शीलवत्या मुदान्वितं ॥ १ ॥

ब्राह्मण उवाच ॥

राजवर्य्य कृतार्थोऽस्मि यतो धर्म्मो हि रक्षितः ।

धर्म्मज्ञेनेह भवता भार्य्यामानयता मम ॥ २ ॥

राजोवाच ॥

कृतार्थस्त्वं द्विजश्रेष्ठ निजधर्म्मानुपालनात् ।
वयं सङ्कटिनो विप्र येषां पत्नी न वेश्मनि ॥ ३ ॥

ब्राह्मण उवाच ॥

नरेन्द्र सा हि विपिने भक्षिता श्वापदैर्यदि ।
अलन्तया किमन्यस्या न पाणिर्गृह्यते त्वया ॥
क्रोधस्य वशमागम्य धर्म्मो न रक्षितस्त्वया ॥ ४ ॥

राजोवाच ॥

न भक्षिता मे दयिता श्वापदैः सा हि जीवति ।
अविदूषितचारित्रा कथमेतत्करोम्यहं ॥ ५ ॥

ब्राह्मण उवाच ॥

यदि जीवति ते भार्य्या न चैव व्यभिचारिणी ।
तदपत्नीकताजन्म किं पापं क्रियते त्वया ॥ ६ ॥

राजोवाच ॥

आनीतापि हि सा विप्र प्रतिकूला सदैव मे ।
दुःखाय न सुखायालं तस्या मैत्री न वै मयि ॥
तथा त्वं कुरु यत्नं मे यथा सा वशगामिनी ॥ ७ ॥

ब्राह्मण उवाच ॥

तव संप्रीतये तस्या वरेष्टिरुपकारिणी ।
क्रियते मित्रकामैर्या मित्रविन्दां करोमि तां ॥ ८ ॥
अप्रीतयोः प्रीतिकरी सा हि संजननी परं ।

भार्य्यापत्योर्मनुष्येन्द्र तान्तवेष्टिं करोम्यहं ॥ ९ ॥
यत्र तिष्ठति सा सुभ्रुस्तव भार्य्या महीपते ।
तस्मादानीयतां सा ते परां प्रीतिमुपैष्यति ॥ १० ॥

मार्कण्डेय उवाच ॥

इत्युक्तः स तु सम्भारानशेषानवनीपतिः ।
आनिनाय चकारेष्टिं स च तां द्विजसत्तमः ॥ ११ ॥
सप्तकृत्वः स तु तदा चकारेष्टिं पुनः पुनः ।
तस्य राज्ञो द्विजश्रेष्ठो भार्य्यासम्पादनाय वै ॥ १२ ॥
यदारोपितमैत्रान्तामममन्यत महामुनिः ।
स्वभर्त्तरि तदा विप्रस्तमुवाच नराधिपं ॥ १३ ॥
आनीय तां नरश्रेष्ठ या तवेष्टात्मनोऽन्तिकं ।
भुंच्व भोगांस्तया सार्द्धं यज यज्ञांस्तथादृतः ॥ १४ ॥

मार्कण्डेय उवाच ॥

इत्युक्तस्तेन विप्रेण भूपालो विस्मितस्तदा ।
सस्मार तं महावीर्य्यं सत्यसन्धं निशाचरं ॥ १५ ॥
स्मृतस्तेन तदा सद्यः समुपेत्य नराधिपं ।
किं करोमीति सोऽप्याह प्रणिपत्य महामुने ॥ १६ ॥
ततस्तेन नरेन्द्रेण विस्तरेण निवेदिते ।
गत्वा पातालमादाय राजपत्नीमुपाययौ ॥ १७ ॥
आनीता चातिहार्द्देन सा ददर्श तदा पतिं ।
उवाच च प्रसीदेति भूयोभूयो मुदान्विता ॥ १८ ॥
ततः स राजा रभसा परिष्वज्याह मानिनीं ।

प्रिये प्रसन्न एवाहं भूयोऽप्येवं ब्रवीषि किं ॥ १९ ॥

पत्न्युवाच ॥

यदि प्रसादप्रवणं नरेन्द्र मयि ते मनः ।
तदेतदभियाचे त्वां तत्कुरुष्व ममार्हणं ॥ २० ॥

राजोवाच ॥

निःशङ्कं ब्रूहि मत्तो यद्भवत्या किञ्चिदीप्सितं ।
तदलभ्यं न ते भीरु तवायत्तोऽस्मि नान्यथा ॥ २१ ॥

पत्न्युवाच ॥

मदर्थं तेन नागेन सुता शप्ता सखी मम ।
मूका भविष्यसीत्याह सा च मूकत्वमागता ॥ २२ ॥
तस्याः प्रतिक्रियां प्रीत्या मम शक्नोति चेद्भवान् ।
वाग्विभागप्रशान्त्यर्थं ततः किं न कृतं मम ॥ २३ ॥

मार्कण्डेय उवाच ॥

ततः स राजा तं विप्रमाहास्मिन् किदृशी क्रिया ।
तन्मूकतापनोदाय स च तं प्राह पार्थिवं ॥ २४ ॥

ब्राह्मण उवाच ॥

भूप सारस्वतीमिष्टिं करोमि वचनात्तव ।
पत्नी तवेयमानृण्यं यातु तद्वाक्प्रवर्त्तनात् ॥ २५ ॥

मार्कण्डेय उवाच ॥

इष्टिं सारस्वतीं चक्रे तदर्थं स द्विजोत्तमः ।
सारस्वतानि सूक्तानि जजाप च समाहितः ॥ २६ ॥
ततः प्रवृत्तवाक्यान्तां गर्गः प्राह रसातले ।

उपकारः सखीभर्त्रा कृतोऽयमतिदुष्करः ॥ २७ ॥
इत्थं ज्ञानं समासाद्य नन्दा शीघ्रगतिः पुरं ।
ततो राज्ञीं परिष्वज्य स्वसखीमुरगात्मजा ॥ २८ ॥
तञ्च संस्तूय भूपालं कल्याणोक्त्या पुनः पुनः ।
उवाच मधुरं नागी कृतासनपरिग्रहा ॥ २९ ॥
उपकारः कृतो वीर भवता यो ममाधुना ।
तेनास्म्याकृष्टहृदया यद्ब्रवीमि शृणुष्व तत् ॥ ३० ॥
तव पुत्त्रो महावीर्य्यो भविष्यति नराधिप ।
तस्याप्रतिहतं चक्रमस्यां भुवि भविष्यति ॥ ३१ ॥
सर्व्वार्थशास्त्रतत्त्वज्ञो धर्म्मानुष्ठानतत्परः ।
मन्वन्तरेश्वरो धीमान् भविष्यति स वै मनुः ॥ ३२ ॥

मार्कण्डेय उवाच ॥

इति दत्वा वरं तस्मै नागराजसुता ततः ।
सखीं तां संपरिष्वज्य पातालमगमन्मुने ॥ ३३ ॥
तत्र तस्य तया सार्द्धं रमतः पृथिवीपतेः ।
जगाम कालः सुमहान् प्रजाः पालयतस्तथा । ३४ ॥
ततः स तस्यान्तनयो जज्ञे राज्ञो महात्मनः ।
पौर्णमास्यां यथा कान्तश्चन्द्रः संपूर्णमण्डलः ॥ ३५ ॥
तस्मिन् जाते मुदं प्रापुः प्रजाः सर्व्वा महात्मनि ।
देवदुन्दुभयो नेदुः पुष्पवृष्टिः पपात च ॥ ३६ ॥
तस्य दृष्ट्वा वपुः कान्तं भविष्यं शीलमेव च ।
औत्तमश्चेति मुनयो नाम चक्रुः समागताः ॥ ३७ ॥

जातोऽयमुत्तमे वंशे तत्र काले तथोत्तमे ।
उत्तमावयवत्त्वेन औत्तमोऽयं भविष्यति ॥ ३८ ॥

मार्कण्डेय उवाच ॥

उत्तमस्य सुतः सोऽथ नाम्ना ख्यातस्तथौत्तमः ।
मनुरासीत्तत्प्रभावो भागुरे श्रूयतां मम ॥ ३९ ॥
उत्तमाख्यानमखिलं जन्म चैवोत्तमस्य च ।
नित्यं शृणोति विद्वेषं स कदाचिन्न गच्छति ॥ ४० ॥
इष्टैर्दारैस्तथा पुत्रैर्बन्धुभिर्वा कदाचन ।
वियोगो नास्य भविता शृण्वतः पठतोऽपि वा ॥ ४१ ॥
तस्य मन्वन्तरं ब्रह्मन् वदतो मे निशामय ।
श्रूयतां तत्र यश्चेन्द्रो ये च देवास्तथर्षयः ॥ ४२ ॥

इति श्रीमार्कण्डेयपुराणे औत्तम मन्वन्तरे ॥ ७२ ॥

त्रिसप्ततितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

मन्वन्तरे तृतीयेऽस्मिन् औत्तमस्य प्रजापतेः ।
देवानिन्द्रमृषीन् भूपान् निबोध गदतो मम ॥ १ ॥
स्वधामानस्तथा देवा यथानामानुकारिणः ।
सत्याख्यश्च द्वितीयोऽन्यस्त्रिदशानां तथा गणः ॥ २ ॥
तृतीये तु गणे देवाः शिवाख्या मुनिसत्तम ।
शिवाः स्वरूपतस्ते तु श्रुताः पापप्रणाशनाः ॥ ३ ॥

प्रतर्द्दनाख्यश्च गणो देवानां मुनिसत्तम ।
चतुर्थस्तत्र कथित औत्तमस्यान्तरे मनोः ॥ ४ ॥
वशवर्त्तिनःपञ्चमेऽपि देवास्तत्र गणे द्विज ।
यथाख्यातस्वरूपास्तु सर्व्वे एव महामुने ॥ ५ ॥
एते देवगणाः पञ्च स्मृता यज्ञभुजस्तथा ।
मन्वन्तरे मनुश्रेष्ठे सर्व्वे द्वादशका गणाः ॥ ६ ॥
तेषामिन्द्रो महाभागस्त्रैलोक्ये स गुरुर्भवेत् ।
शतं क्रतूनामाहृत्य सुशान्तिर्नाम नामतः ॥ ७ ॥
यस्योपसर्गनाशाय नामाक्षरविभूषिता ।
अद्यापि मानवैर्गाथा गीयते तु महीतले ॥ ८ ॥
सुशान्तिर्द्देवराट् कान्तः सुशान्तिं स प्रयच्छति ।
सहितः शिवसत्याद्यैस्तथैव वशवर्त्तिनः ॥ ९ ॥
अजः परशुचिर्द्दिव्यो महाबलपराक्रमाः ।
पुत्रास्तस्य मनोरासन् विख्यातास्त्रिदशोपमाः ॥ १० ॥
तत्सूतिसम्भवैर्भूमिः पालिताभून्नरेश्वरैः ।
यावन्मन्वन्तरं तस्य मनोरुत्तमतेजसः ॥ ११ ॥
चतुर्युगानां संख्याता साधिका ह्येकसप्ततिः ।
कृतत्रेतादिसंज्ञानां यान्युक्तानि युगे मया ॥ १२ ॥
स्वतेजसा हि तपसो वरिष्ठस्य महात्मनः ।
तनयास्त्वन्तरे तस्मिन् सप्त सप्तर्षयोऽभवन् ॥ १३ ॥
तृतीयमेतत्कथितं तव मन्वन्तरं मया ।
तामसस्य चतुर्थन्तु मनोरन्तरमुच्यते ॥ १४ ॥

वियोनिजन्मनो यस्य यशसा द्योतितं जगत् ।
जन्म तस्य मनोर्ब्रह्मन् श्रूयतां गदतो मम ॥ १५ ॥
अतीन्द्रियमशेषाणाममूनाञ्चरितन्तथा ।
तथा जन्मापि विज्ञेयं प्रभावश्च महात्मनां ॥ १६ ॥

इति श्रीमार्कण्डेयपुराणे औत्तम मन्वन्तरं समाप्तं ॥ ७३ ॥

चतुःसप्ततितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

राजाभूद्भुवि विख्यातः स्वराष्ट्रो नाम वीर्य्यवान् ।
अनेकयज्ञकृत्प्राज्ञः संग्रामेष्वपराजितः ॥ १ ॥
तस्यायुः सुमहत् प्रादात् मन्त्रिणाराधितो रविः ।
पत्नीनाञ्च शतन्तस्य धन्यानामभवत् द्विज ॥ २ ॥
तस्य दीर्घायुषः पत्न्यो नातिदीर्घायुषो मुने ।
कालेन जग्मुर्निधनं भृत्यमन्त्रिजनास्तथा ॥ ३ ॥
स भार्य्याभिस्तथा युक्तो भृत्यैश्च सहजन्मभिः ।
उद्विग्नचेताः संप्राप वीर्य्यहानिमहर्निशं ॥ ४ ॥
तं वीर्य्यहीनं निभृतैर्भृत्यैस्त्यक्तं सुदुःखितं ।
अनन्तरो विमर्द्दाख्यो राज्याच्चयावितवांस्तदा ॥ ५ ॥
राज्याच्च्युतं सोऽपि वनं गत्वा निर्व्विण्णमानसः ।
तपस्तेपे महाभागो वितस्तापुलिने स्थितः ॥ ६ ॥

ग्रीष्मे पञ्चतपा भूत्वा वर्षास्वभ्रंकषाश्रिकः ।
जलशायी च शिशिरे निराहारो यतव्रतः ॥ ७ ॥
ततस्तपस्यतस्तस्य प्रावृट्काले महाप्लवः ।
बभूवानुदिनं मेघैर्वर्षद्भिरनुसन्ततं ॥ ८ ॥
न दिग्विज्ञायते पूर्व्वा दक्षिणा वा न पश्चिमा ।
नोत्तरा तमसा सर्व्वमनुलिप्तमिवाभवत् ॥ ९ ॥
ततोऽतिप्लवने भूपः स नद्याः प्रेरितस्तटं ।
प्रार्थयन्नपि नावाप ह्रियमाणोऽतिवेगिना ॥ १० ॥
अथ दूरे जलौघेन ह्रियमाणो महीपतिः ।
आससाद जले रौहीं स पुच्छे जगृहे च तां ॥ ११ ॥
तेन स्रवेन स ययावुह्यमानो महीतले ।
इतश्चेतश्चान्धकारे आससाद तटन्ततः ॥ १२ ॥
विस्तारि पङ्कमत्यर्थं दुस्तरं स नृपस्तरन् ।
तयैव कृष्यमाणोऽन्यद्रम्यं वनमवाप सः ॥ १३ ॥
तत्रान्धकारे सा रौही चकर्ष वसुधाधिपं ।
पुच्छे लग्नं महाभागं कृशं धमनिसन्ततौ ॥ १४ ॥
तस्याश्च स्पर्शसम्भूतामवाप मुदमुत्तमां ।
सोऽन्धकारे भ्रमन् भूयो मदनाकृष्टमानसः ॥ १५ ॥
विज्ञाय सानुरागं तं पृष्ठस्पर्शनतत्परं ।
नरेन्द्रं तद्गनस्यान्तः सा मृगी तमुवाच ह ॥ १६ ॥
किं पृष्ठं वेपथुमता करेण स्पृशसे मम ।
अन्यथैवास्य कार्य्यस्य संजाता नृपते गतिः ॥ १७ ॥

नास्थाने वो मनो यातं नागम्याहं तवेश्वर ।
किन्तु त्वत्सङ्गमे विघ्नमेष लोलः करोति मे ॥ १८ ॥

मार्कण्डेय उवाच ॥

इति श्रुत्वा वचस्तस्या मृग्याश्च जगतीपतिः ।
जातकौतूहलो रौद्रीमिदं वचनमब्रवीत् ॥ १९ ॥
का त्वं ब्रूहि मृगीवाक्यं कथं मानुषवद्वद ।
कश्चैव लोलो यो विघ्नं त्वत्सङ्गे कुरुते मम ॥ २० ॥

मृग्युवाच ॥

अहन्ते दयिता भूप प्रागासमुत्पलावती ।
भार्य्या शताग्रमहिषी दुहिता दृढधन्वनः ॥ २१ ॥

राजोवाच ॥

किन्तु यावत्कृतं कर्म्म येनेमां योनिमागता ।
पतिव्रता धर्म्मपरा सा चेत्थं कथमीदृशी ॥ २२ ॥

मृग्युवाच ॥

अहं पितृगृहे बाला सखीभिः सहिता वनं ।
रन्तुं गता ददर्शैकं मृगं मृग्या समागतं ॥ २३ ॥
ततः समीपवर्त्तिन्या मया सा ताडिता मृगी ।
मया त्रस्ता गतान्यच्च क्रुद्धः प्राह ततो मृगः ॥ २४ ॥
मूढे किमेवं मत्तासि धिक्ते दौःशील्यमीदृशं ।
आधानकालो येनायं त्वया मे विफलीकृतः ॥ २५ ॥
वाचं श्रुत्वा ततस्तस्य मानुषस्येव भाषतः ।
भीता तमब्रवं कोऽसीत्येतां योनिमुपागतः ॥ २६ ॥

ततः स प्राह पुत्रोऽहमृषेर्निर्वृतिचक्षुषः ।
सुतपा नाम मृग्यान्तु साभिलाषो मृगोऽभवं ॥ २७ ॥
इमाञ्चानुगतः प्रेम्णा वाञ्छितश्चानया वने ।
त्वया वियोजिता दुष्टे तस्माच्छापं ददामि ते ॥ २८ ॥
मया चोक्तं तवाज्ञानादपराधः कृतो मुने ।
प्रसादं कुरु शापं मे न भवान् दातुमर्हति ॥ २९ ॥
इत्युक्तः प्राह मां सोऽपि मुनिरित्थं महीपते ।
न प्रयच्छामि शापं ते यद्यात्मानं ददामि ते ॥ ३० ॥
मया चोक्तं मृगी नाहं मृगरूपधरा वने ।
लप्स्यसेऽन्यां मृगीन्तावन्मयि भावो निवर्त्यतां ॥ ३१ ॥
इत्युक्तः कोपरक्ताक्षः स प्राह स्फुरिताधरः ।
नाहं मृगी त्वयेत्युक्तं मृगी मूढे भविष्यसि ॥ ३२ ॥
ततो भृशं प्रव्यथिता प्रणम्य मुनिमब्रवं ।
स्वरूपस्थमतिक्रुद्धं प्रसीदेति पुनः पुनः ॥ ३३ ॥
बालानभिज्ञा वाक्यानां ततः प्रोक्तमिदं मया ।
पितर्य्यसति नारीभिर्व्रियते हि पतिः स्वयं ॥ ३४ ॥
सति ताते कथञ्चाहं वृणोमि मुनिसत्तम ।
सापराधाथवा पादौ प्रसीदेश नमाम्यहं ॥ ३५ ॥
प्रसीदेति प्रसीदेति प्रणताया महामते ।
इत्थं लालप्यमानायाः स प्राह मुनिपुङ्गवः ॥ ३६ ॥
न भवत्यन्यथा प्रोक्तं मम वाक्यं कदाचन ।
मृगी भविष्यसि मृता वनेऽस्मिन्नेव जन्मनि ॥ ३७ ॥

मृगत्वे च महाबाहुस्तव गर्भमुपैष्यति ।
लोलो नाम मुनेः पुत्त्रः सिद्धवीर्य्यस्य भाविनि ॥ ३८ ॥
जातिस्मरा भवित्री त्वं तस्मिन् गर्भमुपागते ।
स्मृतिं प्राप्य तथा वाचं मानुषीमीरयिष्यसि ॥ ३९ ॥
तस्मिन् जाते मृगीत्वात् त्वं विमुक्ता पतिनार्च्चिता ।
लोकानवाप्स्यसि प्राप्या य न दुष्कृतकर्म्मभिः ॥ ४० ॥
सोऽपि लोलो महावीर्य्यः पितृशत्रून् निपात्य वै ।
जित्वा वसुन्धरां कृत्स्नां भविष्यति ततो मनुः ॥ ४१ ॥
एवं शापमहं लब्ध्वा मृता तिर्य्यक्त्वमागता ।
त्वत्संस्पर्शाच्च गर्भोऽसौ सम्भूतो जठरे मम ॥ ४२ ॥
अतो ब्रवीमि नास्थाने तव यातं मनो मयि ।
न चाप्यगम्यो गर्भस्थो लोलो विघ्नं करोत्यसौ ॥ ४३ ॥

मार्कण्डेय उवाच ॥

एवमुक्तस्ततःसोऽपि राजा प्राप्य परां मुदं ।
पुत्त्रो ममारीञ्जित्वेति पृथिव्यां भविता मनुः ॥ ४४ ॥
ततस्तं सुषुवे पुत्त्रं सा मृगी लक्षणान्वितं ।
तस्मिन् जाते च भूतानि सर्व्वाणि प्रययुर्मुदं ॥ ४५ ॥
विशेषतश्च राजासौ पुत्त्रे जाते महाबले ।
सा विमुक्ता मृगी शापात्प्राप लोकाननुत्तमान् ॥ ४६ ॥
ततस्तस्यर्षयः सर्व्वे समेत्य मुनिसत्तम ।
अवेक्ष्य भाविनीमृद्धिं नाम चक्रुर्महात्मनः ॥ ४७ ॥
तामसीं भजमानायां योनिं मातर्य्यजायत ।

तमसा चावृते लोके तामसोऽयं भविष्यति ॥ ४८ ॥
ततः स तामसस्तेन पित्रा संवर्द्धितो वने ।
जातवृद्धिरुवाचेदं पितरं मुनिसत्तम ॥ ४९ ॥
कस्त्वं तात कथं वाहं पुत्त्रो माता च का मम ।
किमर्थमागतश्च त्वमेतत्सत्यं ब्रवीहि मे ॥ ५० ॥

मार्कण्डेय उवाच ॥

ततः पिता यथा वृत्तं स्वराज्यच्यावनादिकं ।
तस्याचष्टे महाबाहुः पुत्त्रस्य जगतीपतिः ॥ ५१ ॥
श्रुत्वा तत्सकलं सोऽपि समाराध्य च भास्करं ।
अवाप दिव्यान्यस्त्राणि ससंहाराण्यशेषतः ॥ ५२ ॥
कृतास्त्रस्तानरीन् जित्वा पितुरानीय चान्तिकं ।
अनुज्ञातान् मुमोचाथ तेन स्वं धर्ममास्थितः ॥ ५३ ॥
पितापि तस्य स्वान् लोकांस्तपोयज्ञसमार्ज्जितान् ।
विसृष्टदेहः संप्राप्तो दृष्ट्वा पुत्त्रमुखं सुखं ॥ ५४ ॥
जित्वा समस्तां पृथिवीं तामसाख्यः स पार्थिवः ।
तामसाख्यो मनुरभूत्तस्य मन्वन्तरं शृणु ॥ ५५ ॥
ये देवा यत्पतिर्यश्च देवेन्द्रो ये तथर्षयः ।
ये पुत्त्राश्च मनोस्तस्य पृथिवीपरिपालकाः ॥ ५६ ॥
सत्यास्तथान्ये सुधियः सुरूपा हरयस्तथा ।
एते देवगणास्तत्र सप्तविंशतिका मने ॥ ५७ ॥
महाबलो महावीर्य्यः शतयज्ञोपलक्षितः ।
शिखिरिन्द्रस्तथा तेषां देवानामभवद्विभुः ॥ ५८ ॥

ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वलकस्तथा ।
पीवरश्च तथा ब्रह्मन् सप्त सप्तर्षयोऽभवन् ॥ ५९ ॥
नरः क्षान्तिः शान्तदान्तजानुजङ्घादयस्तथा ।
पुत्त्रास्तु तामसस्यासन् राजानः सुमहाबलाः ॥ ६० ॥

इति श्रीमार्कण्डेयपुराणे तामसमन्वन्तरे ॥ ७४ ॥

पञ्चसप्ततितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

पञ्चमोऽपि मनुर्ब्रह्मन् रैवतो नाम विश्रुतः ।
तस्योत्पत्तिं विस्तरशः शृणुष्व कथयामि ते ॥ १ ॥
ऋषिरासीन्महाभाग ऋतवागिति विश्रुतः ।
तस्यापुत्त्रस्य पुत्त्रोऽभूद्रेवत्यन्तो महात्मनः ॥ २ ॥
स तस्य विधिवच्चक्रे जातकर्म्मादिकाः क्रियाः ।
तथोपनयनादींश्च स चाशीलोऽभवन्मुने ॥ ३ ॥
यतः प्रभृति जातोऽसौ ततः प्रभृति सोऽप्यृषिः ।
दीर्घरोगपरामर्षमवाप मुनिपुङ्गवः ॥ ४ ॥
माता तस्य परामार्त्तिं कुष्ठरोगादिपीडिता ।
जगाम स पिता चास्य चिन्तयामास दुःखितः ॥ ५ ॥
किमेतदिति सोऽप्यस्य पुत्त्रोऽप्यत्यन्तदुर्म्मतिः ।
जग्राह भार्य्यामन्यस्य मुनिपुत्त्रस्य सम्मुखीं ॥ ६ ॥

ततो विषण्णमनसा ऋतवागिदमुक्तवान् ।
अपुत्त्रता मनुष्याणां श्रेयसे न कुपुत्त्रता ॥ ७ ॥
कुपुत्त्रो हृदयायासं सर्व्वदा कुरुते पितुः ।
मातुश्च स्वर्गसंस्थांश्च स्वपितॄन् पातयत्यधः ॥ ८ ॥
सुहृदां नोपकाराय पितॄणाञ्च न तृप्तये ।
पित्रोर्दुःखाय धिग्जन्म तस्य दुष्कृतकर्म्मणः ॥ ९ ॥
धन्यास्ते तनया येषां सर्व्वलोकाभिसम्मताः ।
परोपकारिणः शान्ताः साधुकर्म्मण्यनुव्रताः ॥ १० ॥
अनिर्वृतं तथा मन्दं परलोकपराङ्मुखं ।
नरकाय न सद्गत्यै कुपुत्त्रालम्बि जन्म नः ॥ ११ ॥
करोति सुहृदां दैन्यमहितानां तथा मुदं ।
अकाले च जरां पित्रोः कुपुत्त्रः कुरुते ध्रुवं ॥ १२ ॥

मार्कण्डेय उवाच ॥

एवं सोऽत्यन्तदुष्टस्य पुत्त्रस्य चरितैर्मुनिः ।
दह्यमानमनोवृत्तिर्वृत्तं गर्गमपृच्छत ॥ १३ ॥

ऋतवागुवाच ॥

सुव्रतेन पुरा वेदा गृहीता विधिवन्मया ।
समाप्य वेदान् विधिवत्कृतो दारपरिग्रहः ॥ १४ ॥
सदारेण क्रियाः कार्य्याः श्रौताः स्मार्त्ता वषट्क्रियाः ।
न मे न्यूनाः कृताः काश्चिद्यावदद्य महामुने ॥ १५ ॥
गर्भाधानविधानेन न काममनुरुन्ध्यता ।
पुत्त्रार्थं जनितश्चायं पुन्नाम्नो बिभ्यता मुने ॥ १६ ॥

सोऽयं किमात्मदोषेण मम दोषेण वा मुने ।
अस्मद्दुःखावहो जातो दौःशील्याद्बन्धुशोकदः ॥ १७ ॥

गर्ग उवाच ॥

रेवत्यन्ते मुनिश्रेष्ठ जातोऽयं तनयस्तव ।
तेन दुःखाय ते दुष्टे काले यस्मादजायत ॥ १८ ॥
न तेऽपचारो नैवास्य मातुर्नायं कुलस्य ते ।
तस्य दौःशील्यहेतुस्तु रेवत्यन्तमुपागतं ॥ १९ ॥

ऋतवागुवाच ॥

यस्मान्ममैकपुत्रस्य रेवत्यन्तसमुद्भवं ।
दौःशील्यमेतत्मा तस्मात्पततामाशु रेवती ॥ २० ॥

मार्कण्डेय उवाच ॥

तेनैवं व्याहृते शापे रेवत्यृक्षं पपात ह ।
पश्यतः सर्व्वलोकस्य विस्मयाविष्टचेतसः ॥ २१ ॥
रेवत्यृक्षञ्च पतितं कुमुदाद्रौ समन्ततः ।
भापयामास सहसा वनकन्दरनिर्झरं ॥ २२ ॥
कुमुदाद्रिश्च तत्पातात् ख्यातो रैवतकोऽभवत् ।
अतीव रम्यः सर्व्वस्यां पृथिव्यां पृथिवीधरः ॥ २३ ॥
तस्यर्क्षस्य तु या कान्तिर्जाता पङ्कजिनीसरः ।
ततो जज्ञे तदा कन्या रूपेणातीव शोभना ॥ २४ ॥
रेवतीकान्तिसम्भूतां तां दृष्ट्वा प्रमुचो मुनिः ।
तस्या नाम चकारेत्थं रेवती नाम भागुरे ॥ २५ ॥
पोषयामास चैवैतां स्वाश्रमाश्वाससम्भवां ।